B *Prakaraṇa Pañcikā of Śalikanātha Miśra with the Nyāya-siddhi*. Ed. A. Subrahmaṇya Śāstrī. Varanasi: Banaras Hindu University, 1961. [This edition is used for citation.]

C *Prakaraṇapañcikā nāma Prabhākaramatānusāri-Mīmāṃsādarśanam Mahāmahopādhyāya-Śrī-Śālikanāthamiśra-viracitam*. Ed. Mukunda Śāstrī. Benares: Chowkhamba Sanskrit Series Office, 1904.

P *Prakaraṇapañcikā*. *Pandit*, 1 (1866), 2 (1867), 5 (1870-71).

*Pramāṇavārttika* *The Pramāṇavārttikam of Dharmakīrti*: *the First Chapter with the Autocommentary*. Ed. Raniero Gnoli. Roma: Istituto Italiano per il Medio ed Estremo Oriente, 1960.

*Pramāṇaviniścaya* *Dharmakīrti's Pramāṇaviniścaya Chapter 3*. Ed. Pascale Hugon and Toru Tomabechi. Beijing - Vienna: China Tibetology Publishing House / Austrian Academy of Sciences Press, 2011.

*Pramāṇasamuccayaṭīkā* *Jinendrabuddhi's Viśālāmalavatī Pramāṇasamuccayaṭīkā Chapter 2*. Ed. Horst Lasic, Helmut Krasser, Ernst Stein-

kellner. Beijing – Vienna: China Tibetology Publishing House / Austrian Academy of Sciences Press, 2012.

*Praśastapādabhāṣya* (= *Padārthadharmasaṃgraha*)

PPBh — *Word Index to the Praśastapādabhāṣya*. Johannes Bronkhorst & Yves Ramseier. Delhi: Motilal Banarsidass, 1994.

*Bṛhatī* — *Bṛhatī of Prabhākara Miśra with the Ṛjuvimalā Pañcikā of Śālikanātha*. Ed. S. K. Rāmanātha Śāstrī (Parts I–II), S. Subrahmanya Sastri (Parts III–V). Madras: University of Madras, 1934, 1936, 1962, 1964, 1967.

*Mīmāṃsābhāṣyapariśiṣṭa* — See Part II of *Bṛhatī*.

*Vaiśeṣikasūtra* — *Vaiśeṣikasūtra of Kaṇāda*. Ed. Śrī Jambūvijayajī. Baroda: Oriental Institute, 1982.

*Śābarabhāṣya* — See *Bṛhatī*.

*Ślokavārttika* — *Ślokavārttika of Śrī Kumārila Bhaṭṭa*. Ed. Swāmī Dvārikadāsa Śāstrī. Varanasi: Tara Publications, 1978.

**Secondary literature**

Acharya, Diwakar

2006 *Vācaspatimiśra's Tattvasamīkṣā. The Earliest Commentary on Maṇḍanamiśra's Brahmasiddhi. Critically Edited with an Introduction and Critical Notes*. Stuttgart: Franz Steiner Verlag.

Cummins, Patrick T.

2020 "Commands and the Doctrine of the *Apūrva* in Prābhākara Mīmāṃsā." *The Journal of Hindu Studies*, 13–3, 203–261.

Frauwallner, Erich

1968 *Materialien zur ältesten Erkenntnislehre der Karmamīmāṃsā*. Wien:

Hermann Böhlaus Nachf.

Kajiyama, Yuichi

1966 "An Introduction to Buddhist Philosophy: An Annotated Translation of the Tarkabhāṣā of Mokṣākaragupta." *Kyōto Daigaku Bungakubu Kenkyū Kiyō*, 10, 1–173.

Kataoka, Kei

2003 "Keiken to Naisei: Henjû Kankei no Haaku-hôhô o meguru Giron no Hensen." [Experience and Reflection: Historical Development of the Argument on the Way How to Grasp Invariable Concomitance.] *Nanto Bukkyô*, 83, 1–32.

2005 "Critical Edition of the *Īśvarasiddhi* Section of Bhaṭṭa Jayanta's *Nyāyamañjarī*." *The Memoirs of the Institute of Oriental Culture*, 148, 350 (79)–297 (132).

2011 *Kumārila on Truth, Omniscience, and Killing*. 2 parts. Verlag der Österreichischen Akademie der Wissenschaften.

2014 "Sucaritamiśra's Critique of *Apoha*: A Critical Edition of *Kāśikā* ad *Ślokavārttika apoha* v. 1." *The Memoirs of Institute for Advanced Studies on Asia*, 165, 362 (1)–289 (74).

2018 "Sucaritamiśra on *Apoha*." *Journal of Indological Studies*, 28&29 (2016–2017), 25–49.

2020a "Śālikanātha on Language Acquisition: A Study of "Vākyārthamātṛkā" II." In: Alessandro Graheli ed., *The Bloomsbury Research Handbook of Indian Philosophy of Language*, Bloomsbury, 278–294.

2020b "A Critical Edition of *Śābarabhāṣya* ad 1.1.24–26: *Vākyādhikaraṇa*." *The Memoirs of Institute for Advanced Studies on Asia*, 177, 368 (1)–342 (27).

Katre, Sumitra M.

1989 *Aṣṭādhyāyī of Pāṇini*. Delhi: Motilal Banarsidass.

Keith, A. B.

1921 *The Karma-Mīmāṁsā*. London: Oxford University Press.

Krasser, Helmut

2002 *Śaṅkaranandanas Īśvarāpākaraṇasaṅkṣepa*. Teil 2. Wien: Verlag der Österreichischen Akademie der Wissenschaften.

Krishnamacharya, V.

1952 *Descriptive Catalogue of Sanskrit Manuscripts in the Adyar Library. Vol. IX—Mīmāṁsā and Advaita Vedānta*. Madras: The Adyar Library.

Mīmāṃsaka, Yudhiṣṭhira

1987 *Ācārya-śabarasvāmi-viracitam Jaiminīya-mīmāṃsā-bhāṣyam Ārṣamata-vimarśinyā Hindī-vyākhyayā sahitam*. Ed. Yudhiṣṭhiro Mīmāṃsaka. Bahālgaṛh: Rāmlāl Kapūr Ṭrasṭ. [His introduction (*upodghāta*) contains *Śāstrāvatāra-Mīmāṃsā*.]

Muroya, Yasutaka

2011 "Bhāsarvajña's interpretation of *bhāva eva nāśaḥ* and a related chronological problem." In: *Religion and Logic in Buddhist Philosophical Analysis. Proceedings of the Fourth International Dharmakīrti Conference, Vienna, August 23–27, 2005*, edited by Helmut Krasser, Horst Lasic, Eli Franco, Birgit Kellner, 341–361.

Ollett, Andrew

2020 "Śālikanātha's "Introduction" to His "Fundamentals of Sentence Meaning"." In: Alessandro Graheli ed., *The Bloomsbury Research Handbook of Indian Philosophy of Language*, Bloomsbury, 251–277.

Omae, Futoshi

2018 "Indo Koten Tetsugaku Bunken no Shahon Shiryō ni tsuite: Ślokavārttika Kankei Shahon no Genjō." *Sōgō Seisaku Ronsō* (Shimane Kenritsu Daigaku Sōgō Seisaku Gakkai), 35, 45–57.

Ono, Motoi

2000 *Prajñākaraguptas Erklärung der Definition gültiger Erkenntnis.* (*Pramāṇavārttikālaṃkāra zu Pramāṇavārttika II 1–7*). Wien: Verlag der Österreichischen Akademie der Wissenschaften.

Pandurangi, Krishnacharya T.

2004 *Prakaraṇapañcikā of Śālikanātha, with an Exposition in English*. New Delhi: Indian Council of Philosophical Research.

Raja, C. Kunhan

1937 See his Introduction to the *Nayaviveka*.

Sastri, A. Subrahmanya

1961 See the editor's Preface and *Bhūmikā* of the *Prakaraṇapañcikā* (B).

Sastri, K. S. Ramaswami

1956 See his Introduction to the *Tantrarahasya*.

Sastri, V. A. Ramaswami

1936 See *Tattvabindu*.

Saxena, Shishir Rajan

2018 *Linguistic and Phenomenological Theories of Verbal Cognition in Mīmāṃsā. A Study of the Arguments in Śālikanātha's Vākyārthamātṛkā and the Response in Sucarita's Kāśikāṭīkā*. A doctoral dissertation submitted to the Faculty of Asian and Middle Eastern Studies, University of Cambridge. (Available online)

Shida, Taisei

2013 "On the Testimonies of the *śabda* [*nityatā*] *adhikaraṇa*. Section of the

*Ślokavārttikakāśikāṭīkā*." *Journal of Indian and Buddhist Studies*, 61–3, 1108 (50)–1113 (55).

Thakur, Anantalal

1972 "Śālikanātha—The Vaiśeṣika." *Proceedings of the All-India Oriental Conference* (*Varanasi*, *Oct. 1968*), 24, 421–426.

Ye, Alfred X.

2021 "On Śālikanātha's Critique of Īśvara and the Notions of God." *Journal of Indian Philosophy*, published online, 24 April 2021. https://doi.org/10.1007/s10781-021-09469-y.

Yoshimizu, Kiyotaka

1997 *Der 'Organismus' des urheberlosen Veda*. Wien: Institut für Indologie der Universität Wien.

**Synopsis**

1 viṣayaḥ

2 pūrvapakṣaḥ

2.1 anādau vṛddhavyavahāraparaṃparāyām apauruṣeyaḥ saṃbandhaḥ sidhyet

2.2 nānādir vṛddhavyavahāraparaṃparā

2.2.1 paramāṇusaṃyogakārī

2.2.1.1 sāvayavam avayavavyatiṣaṅgasamāsāditasattākam

2.2.1.2 aṇvoḥ saṃyogaḥ

2.2.1.3 paramāṇukarma kṣetrajñasaṃyogāt

2.2.2 adṛṣṭādhiṣṭhātā

2.2.2.1 adṛṣṭaṃ kṣetrajñasamavāyi cetanādhiṣṭhitam

2.2.2.2 na kṣetrajñā adhiṣṭhātāraḥ

2.2.2.3 anyaḥ kaścit

2.2.3 sraṣṭā

2.2.3.1 jñānaśaktiḥ

2.2.3.2 adhiṣṭhānaprakāraḥ

2.2.3.3 prayojanam

2.2.3.4 kādācitkapravṛttiḥ

2.2.4 upasaṃhāraḥ

2.3 sāmānyatodṛṣṭam anumānam

2.3.1 vācakatā puruṣasaṃketanibandhanā

2.3.2 na svābhāvikī

2.3.3 na niyame saṃketasya vyāpāraḥ

2.4 jagannirmātaiva vedakartā

2.4.1 pauruṣeyatve 'pi prāmāṇyam

2.4.2 sraṣṭṛbodhakamantrārthavādāḥ

3 siddhāntaḥ

3.1 gavādiṣu na saṃketanibandhanaṃ vācakatvam

3.1.1 gavādipadeṣv anumānaṃ na śakyate kartum

3.1.2 arthapratipattiḥ śaktijñānamātranibandhanā dṛśyate

3.1.3 tayor vaiṣamyam

3.2 pratyanumānam

3.3 nirmāṇam

3.3.1 naikadaiva sakalajanasaṃbhavaḥ

3.3.2 pūrvajanā mātṛpitṛsaṃbandhanibandhanātmalābhāḥ

3.3.3 yonijānāṃ saṃbhavaḥ

3.4 neśvaro 'dhiṣṭhātā

3.4.1 kṣetrajñā evādhiṣṭhātāraḥ

3.4.2 īśvaro 'py ajñaḥ

3.4.2.1 nendriyāṇi kāraṇam

3.4.2.2 na kevalaṃ manaḥ kāraṇam

3.4.2.3 nānyat kāraṇam

3.4.2.4 neśvarabuddhir akāraṇā

3.4.3 adhiṣṭhānārthaḥ

3.4.4 dharmādharmapravṛttiḥ

3.4.4.1 na kriyā

3.4.4.2 notpattiḥ

3.4.4.3 na phaladānam

3.5 neśvarecchayā paramāṇava eva pravartante

3.5.1 dṛṣṭāntābhāvāt

3.5.2 necchāmātreṇa pravṛttiḥ

3.5.3 necchāyā hetur asti

3.5.4 na nityā tasyecchā

3.6 acetanatvahetuviśeṣaṇam

3.6.1 prayojanavad acetanaṃ cetanādhiṣṭhitam

3.6.2 vigrahādimadadhiṣṭhānayogyam evācetanaṃ cetanādhiṣṭhitam

3.6.2.1 nānumānocchedaḥ

3.6.2.2 vigrahavattvādy api vyāptyanupraveśi

3.6.2.3 na vigraharahitacetanānumānam

3.7 neśvarasya sarvajñānam

4 anādir vṛddhavyavahāraparaṃparā śabdārthāvagamahetuḥ

4.1 na sṛṣṭyādāv īśvarakṛtaḥ saṃketaḥ

4.2 anādir eva vṛddhavyavahāraparaṃparā

4.3 pauruṣeyatve vedānām aprāmāṇyam

4.4 vedānām apauruṣeyatvam
4.4.1 kartur asmaraṇāt
4.4.2 na kartranumānam
4.4.3 kāṭhakādisamākhyā
4.4.4 mantrārthavādāḥ
4.4.5 śabdārthasaṃbandhasyāpauruṣeyatvam
5 prakaraṇopasaṃhāraḥ

# विमलाञ्जनम् ।

## [1 विषयः]

अपौरुषेये संबन्धे सिद्धे शब्दार्थयोर्द्वयोः ।
प्रामाण्यं वेदवाक्यानामिति स प्रतिपाद्यते ॥ १ ॥

यदि पौरुषेय एव शब्दानामर्थैः सह संबन्धो भवेत्, तदा
(१) प्रमाणान्तरगोचरेष्वेवार्थेषु पुरुषाणां संकेतकरणशक्तेः,
(२) अपूर्वात्मनि च वेदार्थे प्रमाणानामवकाशाभावात् तत्र संकेताभावात्,
(३) असंकेतिते चावाचकत्वाभ्युपगमात्
दुर्लभमेव प्रामाण्यं वेदवाक्यानामापद्यते—इत्यर्थवानेवापौरुषेयशब्दार्थसंबन्धप्रतिपादनयत्नः ।

---

**2** Cf. *Ṛjuvimalā* I 177.16–17: यदि हि संबन्धः कृतकः, तदा संबन्धोत्तरकालभाविनो वेदा अपि कृतका एव ।
**5** *Śābarabhāṣya* ad 1.1.3–5(5d: *arthe 'nupalabdhe*), I 197,2–198,4, Frauwallner 1968: 48,7–10: अनुपलब्धे च देवतादावर्थेऽनर्थकं संज्ञाकरणमशक्यं च । विशेषान् प्रतिपत्तुं हि संज्ञाः क्रियन्ते विशेषांश्चोद्दिश्य । तद् विशेषेष्वज्ञायमानेषूभयमप्यनवक्लृप्तम् । तस्मादपौरुषेयः शब्दस्यार्थेन संबन्धः ।
**6** Cf. *Śābarabhāṣya* ad 1.1.3–5(5e: *tat pramāṇam anapekṣatvāt*), I 198,4–198,6, Frauwallner 1968: 48,13–14: न ह्येवं सति पुरुषान्तरं प्रत्ययान्तरं वापेक्षते । तस्माच्चोदनालक्षण एव धर्मो नान्यलक्षणः ।

---

**3 प्रतिपाद्यते** ] CPK$_1$V$_1$W$_1$ ; प्रतिपाद्यते ॥ इति B **5 °रगोचरेष्वेवार्थेषु** ] BCPV$_1$W$_1$ ; °रागोचरेषु पूर्वेष्वर्थेषु K$_1$ **5 °करणशक्तेः** ] BCPV$_1$W$_1$ ; °करणाशक्तेर् K$_1$ **6 अपूर्वात्मनि** ] CPK$_1$V$_1$W$_1$ ; अपूर्वकार्यात्मनि B **6 प्रमाणानामवकाशाभावात्** ] CPV$_1$ ; प्रमाणान्तराणामवकाशाभावेन B ; प्रमाणानामवकाराभावात् K$_1$ ; प्रमाणांतराभावात् W$_1$ **8 चावाचक°** ] BK$_1$V$_1$W$_1$ ; च वाचक° CP **8 °पगमात्** ] BW$_1$ ; °पगमे CPK$_1$V$_1$ **9 प्रामाण्यं वेदवाक्यानामा°** ] K$_1$V$_1$ ; वेदवाक्यानां प्रामाण्यमा° BCPW$_1$ **9 °पद्यते** ] CPK$_1$V$_1$W$_1$ ; °पद्येत B **9 इत्य°** ] BCPK$_1$V$_1$ ; इतीत्य° W$_1$ **9 °नेवा°** ] K$_1$V$_1$ ; °नेवायम° BCPW$_1$

## [2 पूर्वपक्षः]

तत्र शब्दार्थसंबन्धं पौरुषेयं प्रचक्षते।
जगदीश्वरनिर्माणं वदन्तो वेदवादिनः॥ २॥

[2.1 अनादौ वृद्धव्यवहारपरंपरायामपौरुषेयः संबन्धः सिध्येत्]

अनादौ हि वृद्धव्यवहारपरंपरायां सत्यां व्यवहारदर्शनसिद्धो वाच्यवाचकभावः शब्दार्थयोरपौरुषेयः प्रसिध्येत्। तथा हि—

(१) वृद्धानां स्वार्थेन व्यवहरमाणानामुपशृण्वन्तो बालाः शब्दश्रवणसमनन्तरभाविना चेष्टाविशेषेण विशिष्टार्थविषयां मनीषामाकलयन्तो वाचकतां शब्दस्याध्यवस्यन्ति।

---

**2** *Ślokavārttika Saṃbandhākṣepaparihāra* 43–44ab: **यदि त्वादौ जगत्सृष्टा धर्माधर्मौ ससाधनौ। यथा शब्दार्थसंबन्धान् वेदान् कश्चित् प्रवर्तयेत्॥ जगद्धिताय, वेदस्य तथा किंचिन्न दुष्यति।**

**5** Cf. *Ṛjuvimalā* I 178,14–15: **पुरुषस्य संबन्धुः सद्भावो वृद्धव्यवहारस्यानादितायाः प्रतिपक्ष इति सो ऽनेन ग्रन्थेन निराक्रियते।**

**6** *Śābarabhāṣya* ad 1.1.3–5(5b), I 193,3–194,3, Frauwallner 1968: 46,2–5: **अस्ति त्वन्यः प्रकारः। वृद्धानां स्वार्थेन व्यवहरमाणानामुपशृण्वन्तो बालाः प्रत्यक्षमर्थं प्रतिपद्यमाना दृश्यन्ते, ते ऽपि वृद्धा यदा बाला आसन्, तदान्येभ्यो वृद्धेभ्यः, ते ऽप्यन्येभ्य इति नास्त्यादिरित्येवं वा भवेत्।**

**9** *Prakaraṇapañcikā Vākyārthamātṛkā* 418,12–13: **व्युत्पित्समानो बाल एवमाकलयति—येयं स्वाधीनास्य प्रवृत्तिः सा मद्वद् बुद्धिपूर्विका—इति।**

---

**2 पौरुषेयं** ] $CPK_1V_1W_1$; **पोरुषेयं** B **3 वादिनः** ] $CPK_1V_1W_1$; **°वादिनः॥ इति** B **5 हि** ] $BCPK_1V_1$; om. $W_1$ **5 व्यवहारदर्शनसिद्धो** ] $W_1$; **वृद्धव्यवहारसिद्धो** B; **वृद्धव्यवहारप्रसिद्धो** CP; **व्यवहारदर्शनप्रसिद्धो** $K_1$; **व्यवहार++++धो** $V_1$ **6 प्रसिध्येत्** ] $BCPK_1W_1$; **प्रसिद्ध्यते** $V_1$ **6 तथा हि** ] $BCPK_1W_1$; **तथा हि तथा हि** $V_1$ **7 व्यवहरमाणानामु°** ] $V_1$; **व्यवहरमाणानां वाक्यमु°** B; **व्यवहारप्रमाणमु°** CP; **व्यवहारमाणानामु°** $K_1$; **संव्यवहारमाणानां वाक्यमु°** $W_1$ **8 °भाविना** ] $BCPK_1V_1W_1^{pc}$; **°भवि** $W_1^{ac}$ **8 विशिष्टार्थविषयां** ] $BCPK_1V_1$; **विशिष्टां** $W_1$ **9 °षामाकलयन्तो** ] $BV_1$; **°षां कल्पयन्तो** $CPW_1$; **°षामाकालयन्तो** $K_1$ **9 वाचकतां** ] $BK_1V_1W_1$; **वाच्यवाचकतां** CP

(२) ते ऽपि वृद्धा यदा बाला आसन्, तदा ते ऽप्यनयैव दिशा व्युत्पद्यन्ते।
(३) येभ्यश्च वृद्धेभ्यस्ते व्युत्पत्तिमलभन्त, ते ऽप्यनयैव दिशा व्युत्पत्तिमलभन्त।
(४) ते ऽप्यन्येभ्यो वृद्धेभ्यः
—इति विनापि संकेतयितारं पुरुषमुपपद्यत एव शब्दार्थयोरनादिवृद्धव्यवहारपरंपरादर्शनसिद्धः संबन्धः।

### [2.2 नानादिर्वृद्धव्यवहारपरंपरा]

नो खल्वनादितैव वृद्धव्यवहारपरंपराया उपपत्तिमती। तथा हि— विदांकुर्वन्तु भवन्तः।

### [2.2.1 परमाणुसंयोगकारी]

#### [2.2.1.1 सावयवमवयवव्यतिषङ्गसमासादितसत्ताकम्]

- तनुभुवनादिकं सावयवमवसीयते।

---

**13** *Ṛjuvimalā* I 190,17–20: **अत्र केचिदर्थवादगतसृष्टिप्रलयश्रुत्युपनिपातमात्रोपजातश्रद्धातिशयविप्रलब्धबुद्धयः कणभक्षाक्षचरणमतप्रवणचेतसः सर्वस्य तनुभुवनादेरीश्वरकारणतामाचक्षाणाः प्रचक्षते—सर्वं सावयवमवयवसंयोगसमासादितात्मलाभमधुनातनमुदीक्षामहे। सावयवं च तनुभुवनादिकम्।**; *Kāśikā* ad *Saṃbandhākṣepaparihāra* 74 (Adyar ms., p. 2985): **तथा हि सर्वं सावयवमवयवव्यतिषङ्गबलोपपादितात्मलाभम् इति।**

---

**1 आसन्** ] BCPK$_1$V$_1$W$_1^{pc}$; **आस** W$_1^{ac}$ **1 तदा** ] BCPK$_1$V$_1$; om. W$_1$ **2 व्युत्पद्यन्ते** ] K$_1$V$_1$W$_1$; **व्युत्पद्यन्ते स्म** BCP **4 ते ऽप्यनयैव दिशा व्युत्पत्तिमलभन्त** ] BK$_1$V$_1$; **तेऽप्यन्येभ्यस्** CP; om. W$_1$ **5 वृद्धेभ्यः** ] BK$_1$V$_1$W$_1$; om. CP **7 °वृद्ध°** ] BK$_1$V$_1$W$_1$; **°वृद्धपरम्परा°** CP **7 °व्यवहारपरंपरादर्शन°** ] V$_1$; **°व्यवहार°** B; **°व्यवहारदर्शन°** CP; **°व्यवहारपरंपरादर्श°** K$_1$; **°व्यवहारपरंपरा°** W$_1$ **7 °सिद्धः** ] BCPK$_1$V$_1$; **°सिद्ध°** W$_1$ **9 नो** ] BCPK$_1$V$_1$; **न** W$_1$ **13 तनु°** ] B; **तरु°** CPK$_1$V$_1$W$_1$ **13 °दिकं** ] V$_1$; **°दिकं सर्वं** BCPK$_1$W$_1$ **13 सावयवम°** ] BCPV$_1$W$_1$; **सावयम°** K$_1$

- यच्च नाम सावयवम्, तदवयवव्यतिषङ्गसमासादितसत्ताकम्।
- पश्यामो हि वयं
    (१) तन्तुव्यतिषङ्गनिबन्धनात्मलाभं पटम्
    (२) कटं च वीरणसंयोगसंपादितसत्ताकं
    सावयवम्।

[2.2.1.2 अण्वोः संयोगः]

एषा च दिक् क्रमात् पटादिभ्यो ऽवतरन्ती आ द्व्यणुकमवतिष्ठते। अण्वोश्च संयोगो नियतमन्यतरकर्मज उभयकर्मजो वाभ्युपगमनी-

---

**7** *Ṛjuvimalā* I 190,20–22: **अवयवसंयोगश्च द्व्यणुकपर्यन्तः, द्व्यणुको ऽप्यवयवी परमाणुद्वयसंयोगारम्भणीयः, परमाण्वोश्च परस्परं कर्मजः संयोगः।**; *Kāśikā* ad *Saṃbandhākṣepaparihāra* 74 (Adyar ms., p. 2985): **द्व्यणुकादिक्रमेणोत्पद्यमानेषु भावेषु नूनमण्वोरपि व्यतिषङ्गहेतुभूतं कर्मान्यतरसमवेतमुभयसमवेतं वास्थेयम्।**; cf. *Jñānaśrīmitranibandhāvali* 240,1–4 (Trilocana's opponnent speaks): **स्यादेतत्। महाभूतोत्पत्तेर्द्व्यणुकादिक्रमस्य घटनिष्पत्तेरपि द्व्यणुकादिक्रमविशेषानुपलब्धेरयं घटं कुर्वन् कुम्भकारो द्व्यणुकमपि करोति। न च तस्योपादानमुपकरणं वा कुलालः प्रत्यक्षतः प्रतिपद्यते। तस्मादयमनेकान्तः—यो यस्य कर्ता स तस्योपादानादि जानातीति।**

---

**1 नाम सावयवम्** ] BCPK$_1$; +++++**वं** V$_1$; **सावयवम्** W$_1$ **1 तदवयव°** ] BCPV$_1$W$_1$; **तदवय°** K$_1$ **1 °व्यतिषङ्ग°** ] BK$_1$V$_1$; **°व्यतिषङ्गबल°** CP; **°व्यतिषंगतः** W$_1$ **1 °तसत्ताकम्** ] K$_1$V$_1$; **°तात्मलाभम्** BCPW$_1$ **2 हि वयं** ] CPK$_1$V$_1$W$_1$; **वयं** B **3 तन्तु°** ] BCPK$_1$V$_1$; **तु°** W$_1$ **3 °षङ्गनिबन्धना°** ] K$_1$V$_1$; **°षङ्गसमासादिता°** B; **°षङ्गाधीना°** CP; **°षंगापादिता°** W$_1$ **4 कटं च** ] BCPK$_1$V$_1$; **कटमपि** W$_1$ **4 वीरण°** ] CPK$_1$V$_1$W$_1^{pc}$; **वीणा°** B; **विवरण°** W$_1$ **5 सावयवम्** ] BCPK$_1$V$_1$; om. W$_1$ **7 एषा च दिक् क्रमात्** ] CPW$_1$; **एषा दिग्** BK$_1$; +++**दिक् क्रमात्** V$_1$ **7 पटादिभ्यो** ] V$_1$; **अन्त्यावयविभ्यो** BCPK$_1$W$_1$ **7 ऽवतरन्ती आ°** ] BCPK$_1$; **वतरन्त्यान्त्या°** V$_1^{ac}$; **वतरन्त्यन्त्या°** V$_1^{pc}$; **वतरन्ति आद्यं** W$_1$ **8 अण्वोश्च संयोगो** ] K$_1$V$_1$W$_1$; **परमाण्वोश्च परस्परसंयोगो** B; **अर्थैश्च नियतसंयोगो** CP **8 नियतमन्यतर°** ] K$_1$V$_1$; **नियतो ऽन्यतर°** BCP; **नियतान्यतर°** W$_1$

यः।

[2.2.1.3 परमाणुकर्म क्षेत्रज्ञसंयोगात्]

कर्म च परमाणुष्वदृष्टवत्क्षेत्रज्ञसंयोगात्, अन्यस्य कारणस्याभावात्।

[2.2.2 अदृष्टाधिष्ठाता]

[2.2.2.1 अदृष्टं क्षेत्रज्ञसमवायि चेतनाधिष्ठितम्]

न चादृष्टमलब्धवृत्ति कार्याय पर्याप्तम्, अचेतनत्वात्। न चाचेतनं चेतनानधिष्ठितं वृत्तिमुपलभते। न खल्वनधिष्ठिता वासी वर्धकिना

---

**3** *Ṛjuvimalā* I 190,22–23: **कर्म चादृष्टवदात्मसंयोगादेव परमाणुषु प्रतिज्ञायते। तदुक्तम्—"अणुमनसोश्चाद्यं कर्मेत्यदृष्टकारितानि"** (*Vaiśeṣikasūtra* 5.2.14) **इति।**; *Kāśikā* ad *Saṃbandhākṣepaparihāra* 74 (Adyar ms., p. 2985): **न च तदहेतुकं संभवतीति हेत्वन्तराभावात् क्षेत्रज्ञगतादृष्टानामेव तस्य हेतुभावः।**

**7** *Ṛjuvimalā* I 190,23–24: **अदृष्टं चाचेतनम्। न चाचेतनं चेतनानधिष्ठितं क्वचिदपि कार्ये पर्याप्नोति वास्यादिकमिव।**; *Kāśikā* ad *Saṃbandhākṣepaparihāra* 74 (Adyar ms., pp. 2985–86): **तेषामपि नालब्धवृत्तीनां वास्यादीनां हेतुभावः संभवति। न चाचेतनानां चेतनाधिष्ठानमन्तरेण वृत्तिलाभः। न ह्यनधिष्ठिता वर्धकिना वासी वर्धनाय प्रभवतीति। तद्वदेवादृष्टानां चेतनाधिष्ठानसिद्धिः।**

---

**7** $G_1$ starts from **॰मचेतनत्वाद्**

---

**1** **॰नीयः** ] $BCPV_1W_1$; **॰नीयं** $K_1$ **3** **॰ष्वदृष्टव॰** ] $BCPK_1W_1$; **॰ष्व**+++ $V_1$ **3** **॰त्क्षेत्रज्ञ॰** ] $BCPK_1V_1$; **॰त्क्षेत्र॰** $W_1$ **3** **॰संयोगात्** ] $CPK_1V_1W_1$; **॰संयोगात् प्रतिज्ञायते। तदुक्तं "अणुमनसोश्चाऽऽद्यं कर्मेत्यदृष्टकारितम्" इति** B **7** **॰वृत्ति** ] $K_1V_1$; **॰स्ववृत्ति** B; **॰प्रवृत्ति** CP; **॰वृत्ते** $W_1$ **7** **अचेतनत्वात्** ] $V_1$; **अचेतनत्वाद् वासीवत्** $BCPG_1K_1$; **अचेतनत्वाद् वाशिवत्** $W_1$ **8** **न चाचेतनं चेतनानधिष्ठितं** ] $V_1W_1$; **न च चेतनानधिष्ठितमचेतनं** B; **न चानधिष्ठितं प्र॰** CP; **न चाचेतनञ्चेतनानधिष्ठितं प्र॰** $K_1$; **न चाधिष्ठितं प्र॰** $G_1$ **8** **॰मुपलभते** ] $BCPG_1W_1$; **॰मदुपलभ्यते** $K_1$; **॰मदुप++ते** $V_1$ **8** **वासी वर्धकिना** ] $BK_1V_1$; **वर्धकिना वासी** $CPG_1$; **वाशी वर्धकिना** $W_1$

वर्धनाय वर्तते। तदेवमदृष्टमपि क्षेत्रज्ञसमवायि चेतनाधिष्ठितं कार्याय वर्तत इति दर्शनबलादवश्यमभ्युपेतव्यम्।

[2.2.2.2 न क्षेत्रज्ञा अधिष्ठातारः]

न चेदमिह चिन्तनीयम्— "त एव क्षेत्रज्ञास्तेषामदृष्टानामधिष्ठातारो भवेयुः" इति, तेषामज्ञत्वात्। न हि ते स्वसमवायिनी अपि धर्माधर्मलक्षणे अदृष्टे स्वरूपतः कार्यतो वा वेदितुमीशते। यश्च यत् स्वरूपतः कार्यतो वा वेद, स एव तस्याधिष्ठाता। यथा तक्षा वा-

---

**1** *Ślokavārttika Saṃbandhākṣepaparihāra* 74–75: संनिवेशविशिष्टानामुत्पत्तिं यो गृहादिवत्। साधयेच्चेतनाधिष्ठां देहानां तस्य चोत्तरम्॥ कस्यचिद्धेतुमात्रत्वं यद्यधिष्ठातृतेष्यते। कर्मभिः सर्वजीवानां तत्सिद्धेः सिद्धसाधनम्॥

**4** *Ṛjuvimalā* I 190,24–28: न चेदमुचितम्—य एव ते क्षेत्रज्ञाः, त एव तेषामदृष्टानामधिष्ठातारो भवेयुरिति, अज्ञत्वात्। ज्ञाता हि पदार्थस्य पदार्थसामर्थ्यस्य चाधिष्ठातोपलभ्यते यथा तक्षा वास्याः। न च क्षेत्रज्ञाः स्वसमवायिनी अपि धर्माधर्मलक्षणे अदृष्टे स्वरूपतः शक्तितो वा वेदितुमलमिति तदतिरेकी चेतनः कल्प्यते।; *Kāśikā* ad *Saṃbandhākṣepaparihāra* 74 (Adyar ms., p. 2986): न चाश्रयभूताः क्षेत्रज्ञा एवैषामधिष्ठातार इति संभवति। अज्ञा हि ते स्वसमवायिनामप्यदृष्टानां स्वरूपशक्त्योः। न चाज्ञो ऽधिष्ठाता भवति, वास्यादावदर्शनात्। न ह्यनवसितस्वरूपशक्तिरधितिष्ठति वासीन् तक्षा।; cf. *Nyāyamañjarī* Kataoka 2005: 309(106),2–3(§3.16): ननु तेषामेव कर्मणां कर्तार आत्मानश्चेतना अधिष्ठातारो भविष्यन्ति।

---

**1 वर्तते** ] $K_1V_1$; **प्रवर्तते** $BCPG_1W_1$ **1 °दृष्टमपि** ] $CPG_1K_1V_1W_1$; **°दृष्टं** B **2 वर्तत इति** ] $V_1W_1$; **पर्याप्तमिति** $BK_1$; **प्रवर्तत इति** $CPG_1$ **2 °बलाद°** ] $V_1W_1$; **°बलेनावश्यम°** $BCPG_1$; **°बलेनावश्या°** $K_1$ **2 °भ्युपेतव्यम्** ] $CPG_1W_1$; **°भ्युपगमनीयम्** $BK_1$; **°भ्युपे++** $V_1$ **4 त एव क्षेत्रज्ञास्ते°** ] $K_1V_1W_1$; **य एव क्षेत्रज्ञाः, त एव ते°** BCP; **य एव क्षेत्रज्ञा एव ते°** $G_1$ **4 °षामदृष्टानाम°** ] $BCPG_1K_1V_1$; **°षाम°** $W_1$ **5 ते** ] $BCPG_1K_1V_1$; om. $W_1$ **5 अपि** ] $BCPG_1K_1V_1$; **अपि च** $W_1$ **6 यश्च** ] $V_1$; **य एव च** $BG_1K_1W_1$; **य एव** CP **7 वेद** ] $CPG_1V_1W_1$; **वेदितुमीष्टे** B; **वेदितुमी⊔** $K_1$ **7 स एव** ] $BCPV_1$; **स एव च** $G_1$; **⊔एव** $K_1$; **न एव** $W_1$

स्याः।

### [2.2.2.3 अन्यः कश्चित्]

तस्मादन्यः क्षेत्रज्ञेभ्यः सकलक्षेत्रज्ञसमवायिधर्माधर्मलक्षणादृष्टसाक्षात्करणगोचराचिन्तनीयशक्तिविभवः को ऽपि चेतनातिशयो ऽधिष्ठाता नित्यप्रतिष्ठः स्वतन्त्रो ऽभ्युपगन्तव्यः।

## [2.2.3 स्रष्टा]

### [2.2.3.1 ज्ञानशक्तिः]

न चेदं वाच्यम्—"केन प्रमाणेन तस्य क्षेत्रज्ञेष्वसंभाविनी धर्माधर्मसाक्षात्करणशक्तिरवगम्यते" इति। यत एव प्रमाणात्तस्य सद्भावो ऽवगम्यते, तत एव तस्य ज्ञानशक्तिरवगम्यत इत्यन्तर्भावितज्ञान-

---

**3** *Ṛjuvimalā* I 190,28–191,2: तेन चेतनातिशयो ऽधिष्ठाता।; *Kāśikā* ad *Saṃbandhākṣepaparihāra* 74 (Adyar ms., p. 2986): अतः सकलक्षेत्रज्ञगतादृष्टस्वरूपशक्तिविद् अचिन्तनीयमहिमा महेश्वरो भुवनानां तनूनां चाधिष्ठातानुमीयते।; Cf. *Jñānaśrīmitranibandhāvali* 239,21–24 (Trilocana speaks): तत्पुनः क्षित्याद्युपादानं परमाणुचतुष्टयम्, सर्वक्षेत्रज्ञसमवेतानि द्विरूपाणि (°समवेतानि द्विरूपाणि] ms.; °समवेतसिद्धिरूपाणि ed.) कर्माणि, दिक्कालौ चोपकरणम्, सर्वक्षेत्रज्ञलक्षणं च संप्रदानम्, क्षेत्रज्ञोपभोगलक्षणं च प्रयोजनम्। एतत् सर्वं प्रत्यक्षतः प्रतिपद्यमानः कर्ता प्रत्यक्षीकृतसकलविश्वविभागः सर्वज्ञः।

---

**1** वास्याः] BCPG$_1$V$_1$; वस्याः K$_1$; वाश्याः W$_1$ **3** °ज्ञसमवायि°] BK$_1$V$_1$W$_1$; °समवायि° CP; °ज्ञसमवायी G$_1$ **4** °त्करण°] BCPG$_1$K$_1$V$_1$; °त्कार° W$_1$ **4** °राचिन्तनीय°] BG$_1$V$_1$; °रचिन्तनीय° CP; °रो चिन्तनीय° K$_1$; °राः चिंतनीय° W$_1$ **4** चेतनातिशयो] BCPG$_1$V$_1$W$_1$; चेतनाशयो K$_1$ **5** °ता नित्यप्रतिष्ठः] V$_1$; °ता नित्यप्रतिष्ठितः BW$_1$; °ता दिव्यप्रतिष्ठः CP; °तादित्यप्रतिष्ठः G$_1$; °ता नित्यः प्रतिष्ठित K$_1$ **5** °पगन्तव्यः] BK$_1$V$_1$; °पगमनीयः CPG$_1$W$_1$ **8** °संभाविनी] BCPG$_1$K$_1$V$_1$; °संभविनि W$_1$ **9** °त्करण°] BCPG$_1$V$_1$; °त्कार° K$_1$W$_1$ **9** यत] BV$_1$; यतो यत CPG$_1$K$_1$W$_1$ **10** तत] BCPG$_1$K$_1$V$_1$; ततस्तत W$_1$ **10** ज्ञानशक्ति°] BCPG$_1$V$_1$; तज्ज्ञानशक्ति° K$_1$; शक्ति° W$_1$ **10** °रवगम्यत इत्य°] V$_1$W$_1$; °रप्यवगम्यत इति, अ° B; °रपि गम्यते। अ° CPG$_1$; °रपि गम्यते इत्य° K$_1$

शक्तिरेवासौ सामान्यतोदृष्टानुमानगोचरः।

[2.2.3.2 **अधिष्ठानप्रकारः**]

अत एव च "कथमसावधिष्ठाता" इत्यस्यापि पर्यनुयोगस्यानवकाशः।

[2.2.3.3 **प्रयोजनम्**]

"किं तस्याधिष्ठाने प्रयोजनम्" इत्यपि पर्यनुयोगश्चेतनातिशयानुमानाङ्गीकरणेनापाकृतः। क्षेत्रज्ञा हि चेतनाः प्रयोजनमुद्दिश्य प्रवर्तन्ते। स च क्षेत्रज्ञविलक्षणो ऽनपेक्षितप्रयोजन एव स्वतन्त्रः प्रवर्तते।

[2.2.3.4 **कादाचित्कप्रवृत्तिः**]

अत एव स्वातन्त्र्यात् कादाचित्की तस्य प्रवृत्तिरुपपत्तिमती। स्वातन्त्र्यमपि तस्य सत्तानुमानसमधिगम्यमेवेति न पृथक्प्रमाणसव्यपेक्षम्।

---

**6** *Ślokavārttika Saṃbandhākṣepaparihāra* 55: **प्रयोजनमनुद्दिश्य न मन्दो ऽपि प्रवर्तते। एवमेव प्रवृत्तिश्चेच्चैतन्येनास्य किं भवेत्॥**

---

**1 °नुमान°** ] CPG$_1$V$_1$W$_1$; **°नुमानस्य** BK$_1$ **3 अत एव च** ] G$_1$V$_1$W$_1$; **अत एव** BCPK$_1$ **3 कथमसावधिष्ठाता" इ°** ] K$_1$V$_1$; **कथमसावधिष्ठास्यती°** BCPG$_1$; **कथमधिष्ठाते°** W$_1$ **3 °त्यस्यापि** ] BK$_1$V$_1$W$_1$; **°त्यपि** CPG$_1$ **6 °त्यपि** ] CPG$_1$V$_1$W$_1$; **°ति यो ऽयमपि** BK$_1$ **6 °योगश्चे°** ] CPG$_1$V$_1$W$_1$; **°योगः, स चे°** BK$_1$ **7 °करणेनापा°** ] V$_1$W$_1$; **°करणेन परा°** B; **°करणपरा°** CPG$_1$; **°कारणेन परा°** K$_1$ **7 °ज्ञा हि चेतनाः** ] K$_1$V$_1$W$_1$; **°ज्ञो हि चेतनः स्व°** B; **°ज्ञो हि** CPG$_1$ **7 प्रयोजन°** ] BCPG$_1$K$_1$V$_1$; **स्वप्रयोजन°** W$_1$ **8 प्रवर्तन्ते** ] K$_1$V$_1$W$_1$; **प्रवर्तते** BCPG$_1$ **8 स च** ] BCPG$_1$K$_1$W$_1$; ++ V$_1$ **8 °णो ऽनपेक्षित°** ] BK$_1$; **°णो नापेक्षित°** CPG$_1$V$_1$W$_1$ **8 °जन एव** ] BCPG$_1$K$_1$V$_1$; **°जन** W$_1$ **10 अत एव** ] BCPG$_1$K$_1$V$_1$; **अत एव च** W$_1$ **10 कादाचित्की** ] CPG$_1$V$_1$W$_1^{pc}$; **कदाचित्** BW$_1^{ac}$; **क**+++ K$_1$ **10 तस्य** ] BCPG$_1$K$_1$W$_1$; **चास्य** V$_1$ **11 पृथक्प्रमाण°** ] BK$_1$V$_1$W$_1$; **पृथग्लक्षण°** CPG$_1$

### [2.2.4 उपसंहारः]

अतः सिद्धं भुवनस्यादिमत्त्वं तथाभावितया च विनाशित्वम्। कृतका हि भावा ध्रुवविनाशिनः, तथा दृष्टचरा घटादयः—इति नानादित्वं वृद्धव्यवहारपरंपरायाः। तेन बलात् पुरुषसंकेतापेक्षमेव शब्दस्यार्थ-प्रतिबोधकत्वमास्थेयम्।

## [2.3 सामान्यतोदृष्टमनुमानम्]

### [2.3.1 वाचकता पुरुषसंकेतनिबन्धना]

अपि च देवदत्तादिपदेष्वविवादा तावत् पुरुषसंकेतनिबन्धना वाच-कता। तद्दर्शनाद् गवादिशब्दानामपि तथाविधत्वमेवानुमातुमुचितम्।

---

**2** *Ṛjuvimalā* I 191,2–4: **अदृष्टवशोपजातकर्मनिमित्तसंयोगपरमाण्वारब्धद्व्यणुका-दिकार्यपरंपरासंभूतं तनुभुवनादिकमादिमदवगम्यते, तदोत्पत्तिमच्च सकलं विना-शयोगीति साधितमिति कथमिदानीमनादिवृद्धव्यवहारपरंपरेति।**
**8** *Ṛjuvimalā* I 194,20–22: **अस्यार्थः—यथा कृतकसंबन्धे ऽपि देवदत्तादिप-दे वृद्धव्यवहारे व्युत्पत्तिर्भवति, स एव कृतकस्तथा गवादिष्वपि भवत्विति।**; *Ślokavārttika Saṃbandhākṣepaparihāra* 118: **प्रत्यक्षादावुपक्षीणे यो ऽनुमानेन डित्थवत्। संबन्धित्वान्नियोक्तारं गवादावपि कल्पयेत्॥**

---

**2 भुवनस्या°** ] $CPG_1$; **तत्प्रभवस्य तनुभुवनादेरा°** B; **तरुभुवनस्या°** $K_1$; **भु-वना°** $V_1$; **तत्प्रभवस्या°** $W_1$　**2 °दिमत्त्वं** ] $K_1V_1$; **°दिमत्त्वमुत्पत्तिमत्त्वं च** $BCPG_1W_1$　**2 तथाभावितया च** ] $CPG_1V_1$; **तथादिमत्तया** B; **तथाभा-वितया+** $K_1$; **तदादिमत्तया च** $W_1$　**3 ध्रुवविनाशिनः** ] $K_1V_1W_1$; **ध्रुवभा-विविनाशाः** $BCPG_1$　**3 दृष्टचरा** ] $BCPG_1K_1V_1$; **दृष्टाश्च** $W_1$　**4 नानादित्वं वृद्धव्यवहारपरंपरायाः** ] $BK_1$; **वृद्धव्यवहारपरंपरया नानादित्वम्** $CPG_1$; **ना-दित्वं वृद्धव्यवहारपरंपरायाः** $V_1$; **वृद्धपरंपराया नानादित्वं** $W_1$　**4 तेन ब-लात्** ] $CPG_1K_1V_1W_1$; **तेन** B　**4 °संकेतापेक्षमेव** ] em.; **°संकेतादेव** $BK_1$; **°संकेतवशादेव** $CPG_1$; **°संकेतापेक्ष++** $V_1$; **°संकेतबलेन** $W_1$　**4 शब्दस्या°** ] $BCPG_1K_1W_1$; **++स्या°** $V_1$　**5 °र्थप्रतिबोधकत्व°** ] $G_1V_1$; **°र्थप्रतिपत्तिहेतु-त्व°** $BK_1$; **°र्थं प्रति बोधकत्व°** $CPW_1$　**8 °पदे°** ] $BK_1V_1$; **°शब्दे°** $CPG_1$; om. $W_1$　**9 °त्वमेवा°** ] $BG_1V_1$; **°त्वमेवमेवा°** CP; **°त्वम°** $K_1W_1$

अयमेव हि सामान्यतोदृष्टस्य विषयः—यद् अन्यत्र दृष्टम् अन्यत्रावगम्यत इति।

### [2.3.2 न स्वाभाविकी]

देवदत्तादिषु स्वाभाविकं सर्वार्थबोधकत्वमित्यपि न समीचीनम्, प्रमाणाभावात्, पुरुषसंकेतानपेक्षत्वप्रसङ्गाच्च।

### [2.3.3 न नियमे संकेतस्य व्यापारः]

न च नियमे संकेतस्य व्यापारः, प्राक्संकेतादनियतार्थप्रत्ययोदयप्रसक्तेः। क्लेशमात्रफलमिदमुच्यते—"गवादिष्वपि नियतार्थप्रतिपत्तिः

---

4 *Ślokavārttika Saṃbandhākṣepaparihāra* 121: तत्रापि शक्तिनित्यत्वं, नियोगस्य त्वनित्यता। तद्गताच्चाप्यनित्यत्वाच्छक्तौ भ्रान्तिः प्रवर्तते॥; *Kāśikā* ad *Saṃbandhākṣepaparihāra* 121 (Adyar ms., p. 3056): अन्यद्दर्शनम्। डित्थादिशब्दा अपि गवादिशब्दवन्निजयैव शक्त्या सर्वार्थेषु वर्तन्ते। स्वाभाविकी हि तेषां सर्वार्थाभिधानशक्तिरित्युक्तम्—सर्वाकारार्थविज्ञानसमर्थे नियमः कृतः। ( *Ślokavārttika Pratyakṣa* 228cd) इति। नियोगस्तु प्रयोगमात्रं तत्रानित्यम्। न च तदनित्यतया संबन्धस्यानित्यत्वम्। अतो दृष्टान्ताभाव एवेत्याह—"तत्रापि" इति।
7 *Ślokavārttika Pratyakṣa* 228: सर्वाकारपरिच्छेद्यशक्ते ऽर्थे वाचके ऽपि वा। सर्वाकारार्थविज्ञानसमर्थे नियमः कृतः॥

---

**1 अयमेव हि** ] $BCPG_1V_1W_1$; **अयमे हि** $K_1$ **1 °दृष्टस्य** ] $BCPG_1K_1V_1$; **°दृष्टानुमानस्य** $W_1$ **1 यद्** ] $BCPG_1V_1W_1$; **तद्** $K_1$ **2 अन्यत्रावगम्यत इति** ] $CPG_1K_1V_1$; **अन्यत्रानुमीयते** B; **अन्यत्रानुमीयत इति** $W_1$ **4 देवदत्तादिषु** ] $CPG_1K_1V_1W_1$; **देवदत्तादिपदेषु** B **4 सर्वार्थ°** ] $K_1V_1$; **स्वार्थ°** B; **सर्वार्थविषय°** $CPG_1$; **स्वार्थाव°** $W_1$ **4 °बोधकत्वमि°** ] $BCPG_1V_1W_1$; **°बोधकमि°** $K_1$ **5 पुरुषसंकेता°** ] $BK_1V_1$; **संकेता°** $CPG_1W_1$ **5 °नपेक्षत्व°** ] $BCPG_1K_1^{pc}V_1$; **°नपेक्ष°** $K_1^{ac}W_1$ **7 न च** ] $BK_1V_1W_1$; **न हि** $CPG_1$ **7 संकेतस्य** ] $BCPG_1V_1W_1$; **सङ्केत°** $K_1$ **7 °दनियतार्थ°** ] $BCPG_1K_1V_1$; **°दनियत°** $W_1$ **8 °प्रत्ययोदयप्रसक्तेः** ] $K_1$; **°प्रत्ययोदयप्रसङ्गात्** B; **°प्रत्ययोदयप्रसङ्गे ऽपि** $CPG_1$; **°प्रत्ययोत्पादकत्वप्रसक्तेः** $V_1$; **°प्रत्ययापत्तेः** $W_1$ **8 °मिदमु°** ] $BCPG_1K_1V_1$; **°मेवमु°** $W_1$

पुरुषसंकेतायत्तैव, स्वाभाविकी तु सर्वार्थप्रतिपादनशक्तिरुपयोगिन्येव विशिष्टार्थप्रतिपत्तौ” इति। अलममुना प्रतिपन्नार्थविघातिना वादेनातिनिर्बन्धेन।

[2.4 जगन्निर्मातैव वेदकर्ता]

[2.4.1 पौरुषेयत्वे ऽपि प्रामाण्यम्]

किं च यथोदितप्रमाणबलसिद्धे भगवति सकलजगन्निर्माणप्रवीणे धर्माधर्मयोः साक्षात्कर्तरि तत्कृतकत्वेनापि सिध्यति वेदानामपूर्वे ऽर्थे प्रामाण्यम् इति मीमांसकानां विद्वेषमात्रनिबन्धनो ऽयं पौरुषेयपक्षप्रतिक्षेपः।

[2.4.2 स्रष्टृबोधकमन्त्रार्थवादाः]

मन्त्रार्थवादानां च भूयसाममुमर्थमञ्जसा वदतामन्यथा वर्णनमिति।

---

**7** Cf. *Mīmāṃsābhāṣyapariśiṣṭa* II 41,10–12: **तेन शब्दैर्वैदिकैर्व्यवहरद्भिरवश्यं स्मरणीयः संबन्धस्य कर्ता स्याद् व्यवहारस्य च। कर्ता वेदकार इति यावत्।**

---

**1 °यत्तैव**] BCPG$_1$K$_1$V$_1$; **°यत्तेव** W$_1$ **1 सर्वार्थ°**] CPG$_1$K$_1$V$_1$W$_1$; **स्वार्थ°** B **3 वादेनातिनिर्बन्धेन**] BK$_1$; **निबन्धेन** C; **निर्बन्धेन** PG$_1$W$_1$; **वादेनाति++न्धेन** V$_1$ **6 °र्माणप्रवीणे**] CPG$_1$K$_1$V$_1$W$_1$; **°र्माणैकप्रवीणे** B **7 साक्षात्कर्तरि**] BK$_1$V$_1$; **साक्षात्कारिणि** CPG$_1$W$_1$ **7 तत्कृतकत्वेनापि**] V$_1$; **तत्कर्तृकत्वेनापि** CPBG$_1$; **तत्कृतत्वेनापि** K$_1$; **तत्कृतत्वे पि** W$_1$ **7 °पूर्वे ऽर्थे**] BCPG$_1$K$_1$; **°पूर्वे ऽप्यर्थे** V$_1$; **°पूर्वार्थे** W$_1$ **9 °पक्ष°**] K$_1$V$_1$; **°त्वपक्ष°** BCPG$_1$; **°त्व°** W$_1$ **11 °मञ्जसा**] CPG$_1$K$_1$V$_1$W$_1$; **°मज्जसा** B **11 °मन्यथा**] BCPG$_1$K$_1$W$_1$; **°मन्यथो च** V$_1$

## [3 सिद्धान्तः]

औत्पत्तिकस्तु संबन्धः शब्दस्यार्थेन संमतः।
वृद्धसंव्यवहारस्य प्रवाहानादिता यतः॥ ३॥

### [3.1 गवादिषु न संकेतनिबन्धनं वाचकत्वम्]

अहो दौर्गुण्यं भवतः। वेदार्थविदामग्रगण्यस्य भगवतः सकलनयनिधेर्जैमिनेरपौरुषेयः शब्दस्यार्थेन संबन्धो ऽभिमतः। स हि मेने —

### [3.1.1 गवादिपदेष्वनुमानं न शक्यते कर्तुम्]

यद्यपि देवदत्तादिपदानां पुरुषसंकेतनिबन्धनं वाचकत्वम्, तथापि गवादिपदेष्वनुमानं न शक्यते कर्तुम्, अर्थप्रतिपत्तिलक्षणस्य कार्य-

---

**5** **°मग्रगण्यस्य** ] Cf. *Prakaraṇapañcikā Tattvāloka* 333,22: **एतदपि प्रामाणिकाग्रगण्या न साध्वित्याहुः।**
**8** See §2.3.1.
**9** *Ṛjuvimalā* I 195,19–196,13: **अस्यार्थः — यत्र प्रमाणान्तरेण कार्य एव संबन्धो ऽवगतः, तत्र भवतु कार्यता। यत्र पुनः प्रमाणान्तरं कार्यत्वे नास्ति, तत्र कार्यत्वं कल्पयितव्यम्। तच्चार्थप्रतीतिलक्षणात् कार्यात्। तच्चेत् कार्यं वृद्धव्यवहारव्युत्पत्तेरेव प्रत्यक्षभूताया उपपन्नम्, तर्हि न शक्यते कार्यतानुमानम्। न हि प्रत्यक्षदृष्टे कारणान्तरे सति सर्वत्र तदेव कारणमनुमातुं शक्यते। तेनार्थप्रतिपत्तिकार्यबलेन तावन्न शक्यते संबन्धस्य पौरुषेयता वक्तुम्। यत्र पुनः साक्षादेव दृश्यते, तत्र तथैवाङ्गीक्रियते। न चात्र प्रमाणान्तरमस्तीत्युक्तम्।**

---

**2 संमतः** ] BG$_1$K$_1$V$_1$W$_1$; **संभवः** CP  **3 प्रवाहा°** ] BCPG$_1$V$_1$W$_1$; **प्रवारा°** K$_1$  **3 यतः** ] CPG$_1$K$_1$V$_1$W$_1$; **यतः॥ इति** B  **5 अहो दौर्गुण्यं भवतः। वेदार्थ°** ] K$_1$V$_1$; **वेदार्थ°** BCPG$_1$W$_1$  **5 °ग्रगण्यस्य** ] BG$_1$W$_1$; **°ग्रगस्य** CP; **°ग्रण्यस्य** K$_1$; **°ग्रण्येस्य** V$_1$  **5 भगवतः** ] BCPG$_1$K$_1$V$_1$; **भगवस्** W$_1$  **8 देवदत्तादिपदानां** ] K$_1$V$_1$; **देवदत्तादिशब्दानां** B; **देवदत्तादीनां** CPG$_1$; **देवदत्तादीनां पदानां** W$_1$  **8 पुरुष°** ] BCPG$_1$K$_1$V$_1$; **पुरुषप्रणीत°** W$_1$  **9 गवादिपदेष्व°** ] BG$_1$V$_1$; **गवादिष्व°** CP; **गगवादिपदेष्व°** K$_1$; **गवादिशब्दानाम°** W$_1$  **9 कर्तुम्** ] BCPG$_1$V$_1$W$_1$; **वक्तुं** K$_1$  **9 °लक्षणस्य** ] BCPG$_1$K$_1$V$_1$; **°लक्षण°** W$_1$

स्यान्यथाप्युपपत्तेरनैकान्तिकत्वाद् इति। वृद्धव्यवहारनिबन्धनाद्धि स्वार्थे वाचकशक्तिज्ञानादपि बालानां शब्दार्थप्रतीतिर्दृश्यते। तेनैकान्ततः संकेत एव कल्पयितुं न शक्यते।

[3.1.2 अर्थप्रतिपत्तिः शक्तिज्ञानमात्रनिबन्धना दृश्यते]

अपि च शक्तिज्ञानमात्रनिबन्धना गवादिशब्दानामर्थप्रतिपत्तिरिति प्रत्यक्षमेतत्। न च प्रत्यक्षे कारणे सति कारणान्तरमनुमातुं शक्यते।

[3.1.3 तयोर्वैषम्यम्]

देवदत्तादिषु तु यस्य संकेतनिबन्धनार्थप्रतिपत्तिर्भवतु, तस्य संकेत एव कारणम्। तेष्वपि ये व्यवहारदर्शनादेव वाचकतामवगम्यार्थं प्रतिपद्यन्ते, तेषामपि व्यवहारदर्शनप्रसूतं शक्तिज्ञानमेवार्थप्रतिपत्तिकारणम्, न संकेतः। किं तु तत्र संकेतपूर्वक एव व्यवहारोऽर्थप्रतिपत्तिश्च, तथा तत्पूर्वकमपि वाचकत्वज्ञानम्।

---

**1** *Śābarabhāṣya* ad 1.1.3–5(5c), I 195,12–13, Frauwallner 1968: 48,1–2: अस्ति चेद् व्यवहारसिद्धिः, न नियोगतः संबन्धा भवितव्यमित्यर्थापत्तिरपि नास्ति।

---

**1** कार्यस्यान्यथाप्यु° ] BCP$G_1K_1V_1$; कार्यस्याप्यन्यथाप्यु° $W_1$ **2** °निबन्धनाद्धि स्वार्थे ] B$K_1V_1$; °निबंधन° CP$G_1$; °संबंधनाद्धि स्वार्थ° $W_1$ **2** °वाचक° ] CP$G_1K_1V_1$; वाचकत्व° B$W_1$ **2** °प्रतीति° ] $V_1$; °प्रतिपत्ति° BCP$G_1K_1W_1$ **3** तेनैकान्ततः ] BCP$G_1V_1$; तेन नैकान्ततस् $K_1$; तेनैकांतितः $W_1$ **3** न शक्यते ] BCP$G_1V_1W_1$; शक्यते $K_1$ **5** °ज्ञानमात्र° ] B$K_1V_1$; °ज्ञान° CP$G_1W_1$ **5** °ना गवादिशब्दानाम° ] B$K_1V_1W_1$; °ना° CP$G_1$ **6** °क्षमेतत् ] CP$G_1V_1$; °क्षमेवैतत् B$K_1$; °क्षमेव $W_1$ **6** प्रत्यक्षे कारणे सति ] $K_1V_1W_1$; प्रत्यक्षे सति कारणे BCP$G_1$ **8** °दिषु ] CP$G_1K_1V_1$; °दिपदेषु B$W_1$ **8** °त्तिर्भवतु ] $V_1W_1$; °त्तिर्भवति BCP$G_1$; °त्तिर्भवति भवतु $K_1$ **9** तस्य संकेत एव ] BCP$G_1K_1V_1$; संकेत एव तस्य $W_1$ **9** ये ] B$K_1V_1W_1$; om. CP$G_1$ **9** वाचकता° ] B$G_1K_1V_1W_1$; वाचा ता° CP **10** तेषामपि ] B$K_1V_1W_1$; ये तेषामपि CP$G_1$ **11** तत्र ] BCP$G_1K_1V_1$; om. $W_1$ **11** °पूर्वक ] BCP$K_1V_1W_1$; °पूर्व $G_1$ **12** °प्रतिपत्तिश्च ] BCP$G_1K_1W_1$; °प्रतीतिश्च $V_1$ **12** तथा ] B$V_1W_1$; तथा च CP$G_1$; om. $K_1$ **12** °र्वकमपि ] B$K_1V_1W_1$; °र्वमपि CP$G_1$

गवादिपदेषु तु सर्वेषां शक्तिज्ञानादेव व्यवहारसंभवादर्थावगतिरिति वैषम्यम्।

[3.2 प्रत्यनुमानम्]

[पू॰] ननु देवदत्तादिपदेषु दर्शनात् किमिति गवादिपदेष्वपि पूर्वभावी संकेत एव न कल्प्यते।

[उ॰] प्रत्यनुमानग्रस्तत्वात्। शक्यते हि तत्रैवमनुमानं संभावयितुम्—

- पूर्वे ऽपि पुमांसो गवादिशब्दानां सास्नादिमत्यर्थे वृद्धव्यवहारसिद्धशक्तिज्ञानादर्थप्रतिपत्तियोगिनः,
- गवादिशब्देभ्यः सास्नादिमदर्थप्रतिपत्तियोगित्वात्,
- अधुनातनपुरुषवद् इति।

---

**8** Cf. *Ṛjuvimalā* I 196,23–197,16: **अस्यार्थः—"अनेन शब्देनायमर्थो ऽत्र प्रतिपादयितव्यः" इतीत्थं संबन्धः कर्तव्यः। स च न शक्यते कर्तुं यदि वृद्धव्यवहार एव व्युत्पन्नाः केचन शब्दा व्युत्पाद्यानां नाङ्गीक्रियन्ते। ते हि** (ते हि ] em.; हि ed.) **पूर्वं शब्दे ऽव्युत्पन्ना न संबन्धकरणवाक्यार्थमपि बोद्धुमलम्। यदि वृद्धव्यवहारप्रसिद्धाः केचन व्युत्पाद्यानामङ्गीक्रियन्ते, तदा किमपरं संबन्धकरणेन। वृद्धव्यवहार एव व्युत्पत्त्युपायो ऽस्त्विति।**; *Ślokavārttika Saṃbandhākṣepaparihāra* 119: **गवादिशब्दसंबन्धं सर्वो ऽन्यस्मात् प्रपद्यते। मद्वत् तद्व्यवहारित्वात् तस्यैतत् प्रतिसाधनम्॥**

---

**1 व्यवहारसंभवा॰** ] BCPG$_1$V$_1$W$_1$; **व्यवहारदर्शनसंभवा॰** K$_1$ **4 देवदत्तादिपदेषु** ] BCPG$_1$; **देद्वदत्त॰** K$_1$; **तुतिसदेवद**++++ V$_1^{ac}$; **देवद**++++ V$_1^{pc}$; **देवदत्तादिशब्देषु** W$_1$ **4 दर्शनात्** ] CPG$_1$K$_1$; **संकेतदर्शनात्** BW$_1$; ++**नात्** V$_1$ **4 गवादिपदेष्वपि** ] BCPG$_1$V$_1$; **गवादिषु पदेष्वपि** K$_1$; **गवादिष्वपि** W$_1$ **5 ॰भावी** ] BCPG$_1$K$_1$; **॰भावि॰** V$_1$W$_1$ **6 प्रत्य॰** ] CPG$_1$K$_1$V$_1$; **न, प्रत्य॰** BW$_1$ **6 तत्रैवम॰** ] BCPG$_1$K$_1$W$_1$; **तत्रैवा॰** V$_1$ **8 ऽपि** ] CPG$_1$K$_1$V$_1$; **हि** BW$_1$ **8 ॰शब्दानां** ] BV$_1$W$_1$; **॰षु शब्दात्** CP; **॰शब्दात्** G$_1$; **॰शब्दैः** K$_1$ **9 ॰सिद्ध॰** ] BCPG$_1$V$_1$W$_1$; **॰प्रसिद्ध॰** K$_1$ **9 ॰योगिनः** ] CPG$_1$V$_1$; **॰मन्तः** BK$_1$W$_1$ **11 ॰तनपुरुषवद् इति** ] BG$_1$K$_1$V$_1$W$_1$; **॰तनशब्दवदिति** CP

तदेवं प्रत्यनुमानेन निरस्ते ऽनुमाने सकलप्रमाणविरहादपौरुषेयत्वमेव सिध्यति शब्दार्थावगतेः। अत इदमपहस्तितं यदाहुर्बाह्याः—

यज्जातीयो यतः सिद्धः स तस्मादग्निकाष्ठवत्।
अदृष्टहेतुरप्यन्यो ऽविशिष्टः संप्रतीयते॥ इति।

## [3.3 निर्माणम्]

### [3.3.1 नैकदैव सकलजनसंभवः]

[पू॰] ननु च सिध्येदयं मनोरथो यदि वृद्धव्यवहारपरंपराया अनादिता स्यात्। सा तु प्राचीननयनिरस्ता।

---

**2** ॰मपहस्तितं ] Cf. *Prakaraṇapañcikā Jātinirṇaya* 100,8: तदिदमपहस्तितं यदाहुः …

**3** *Pramāṇavārttika* I 242: यज्जातीयो यतः सिद्धः स तस्मादग्निकाष्ठवत्। अदृष्टहेतुरन्यो ऽप्यविशिष्टः संप्रतीयते॥; *Ṛjuvimalā* I 144,15–19: तस्मान्निमित्तान्तरापेक्षायां देवदत्तादिषु दृष्टः समय एव गवादिष्वर्थधीहेतुरिति सांप्रतम्। तथा च कीर्तिनोक्तम्—यज्जातीयो यतः सिद्धः स तस्मादग्निकाष्ठवत्। अदृष्टहेतुरप्यन्यो ऽविशिष्टः संप्रतीयते॥ इति। तदिदमाह—तस्मात्संबन्धान्तरपूर्विकैवार्थावगतिरिति सिद्धा सापेक्षता।

**7** Cf. *Ṛjuvimalā* I 191,4–9: तदिदं प्रतिपक्षकक्ष्यामपि नारोढुं क्रमत इत्युपेक्षितं भगवता भाष्यनिबन्धनकारेण। तथा हि—यद्यपि सिध्येदयं मनोरथः, तथापि कथमेकदैव सर्वे ऽवयविनो विलीयन्त इति समधिगमनीयम्। अधुनेव किमिति कस्यचिदुदयः, कस्यचिद्विलय इति नाङ्गीक्रियते दृष्टानुगमादिति मन्यामहे। एवं च वृद्धव्यवहारपरंपरां को ऽपहरति।

---

**1** ॰नेन निरस्ते ऽनुमाने ] BK$_1$V$_1$; ॰नग्रस्ते ऽनुमाने निरस्ते CPG$_1$; ॰नग्रस्ते W$_1$ **1** सकलप्रमाण॰ ] CPG$_1$K$_1$V$_1$W$_1$; प्रमाण॰ B **2** ॰र्थावगतेः ] CPG$_1$K$_1$V$_1$W$_1$; ॰र्थसंबन्धस्य B **2** ॰पहस्तितं ] BCPG$_1$V$_1$; ॰पहसितं K$_1$W$_1$ **2** यदा॰ ] BCPG$_1$K$_1$V$_1$; यथा॰ W$_1$ **4** ॰हेतुरप्यन्यो ऽविशिष्टः ] K$_1$V$_1$W$_1$; ॰हेतुरप्यन्यस्तद्भावः B; ॰हेतुरपि नो विशिष्टः CPG$_1$ **4** संप्रतीयते॥ इति ] BCPG$_1$K$_1$V$_1$; स प्रतीयत इति W$_1$ **7** ननु च ] CPG$_1$K$_1$V$_1$; ननु BW$_1$ **7** यदि ] BK$_1$V$_1$W$_1$; यदि तु CPG$_1$ **8** स्यात् ] BK$_1$V$_1$W$_1$; om. CPG$_1$ **8** ॰निरस्ता ] V$_1$; ॰निवारिता इति B; ॰निवारिता CPG$_1$K$_1$W$_1$

[उ॰] अत्र वदामः। भवतु सावयवं सर्वमवयवसंयोगारब्धसत्ताकम्, संयोगाभावे च विनश्वरमिति। तथाप्येकदैव सकलजनस्य समुत्पादो विलयश्चेति नास्ति नः प्रमाणम्। प्रत्युत यथादर्शनमिदमेव तावदवसातुमुचितम्—क्रमेण विलयः क्रमेण चोदय इति।

[3.3.2 पूर्वजना मातृपितृसंबन्धनिबन्धनात्मलाभाः]

किं च यथाद्यतना जना मातृपितृसंबन्धनिबन्धनात्मलाभाः, तथा पूर्वे ऽपि जना जनत्वादिति शक्यमेवानुमातुम्।

---

**3** *Ślokavārttika Saṃbandhākṣepaparihāra* 68ab: **प्रलये ऽपि प्रमाणं नः सर्वोच्छेदात्मके न हि।**

**3** *Ślokavārttika Saṃbandhākṣepaparihāra* 67: **कर्तृसर्गविनाशानामथानादित्वकल्पना। सैवं युक्ता यथेदानीं भूतानां दृश्यते क्रमात्॥**; *Tattvasaṃgraha* vv. 2274, 3113 (most probably from the *Bṛhaṭṭīkā*): **इष्यते हि जगत्सर्वं न कदाचिदनीदृशम्। न महाप्रलयो** (**॰प्रलयो**] 3113; **॰प्रलये** 2274) **नाम ज्ञायते** (**ज्ञायते**] 3113; **जायते** 2274) **पारमार्थिकः।**

---

**1 सर्वमवयव॰** ] BCPG$_1$K$_1$V$_1$; **सर्वमयव॰** W$_1$ **2 संयोगा॰** ] V$_1$W$_1$; **अवयवसंयोगा॰** BCPG$_1$K$_1$ **2 ॰भावे च विनश्वरमिति** ] V$_1$; **॰पाये विनश्वरमिति च** B; **॰पाये च विनश्वरमिति** CPG$_1$K$_1$W$_1$ **2 सकलजनस्य** ] CPG$_1$V$_1$W$_1$; **सकलस्य** B; **सकल॰** K$_1$ **2 समुत्पादो** ] CPG$_1$V$_1$W$_1$; **संभवो** BK$_1$ **3 विलयश्चे॰** ] CPG$_1$V$_1$; **विनाशश्चे॰** BK$_1$; **पि लयश्चे॰** W$_1$ **3 ॰ति** ] CPG$_1$K$_1$V$_1$W$_1$; **॰त्यत्र** B **3 नास्ति नः** ] CPG$_1$K$_1$V$_1$W$_1$; **नास्ति** B **3 ॰मिदमेव ताव॰** ] BK$_1$V$_1$; **॰मेताव॰** CPG$_1$; **॰मेव याव॰** W$_1$ **4 क्रमेण विलयः क्रमेण चोदय इति** ] K$_1$V$_1$W$_1$; **क्रमेण चोदयः, क्रमेण विलयश्चेति** B; **क्रमेण चोदयः क्रमेण च विलय इति** CPG$_1$ **6 यथाद्यतना** ] BCPK$_1$V$_1$W$_1$; **यथाद्यना** G$_1$ **6 मातृ॰** ] BK$_1$V$_1$; **माता॰** CPG$_1$W$_1$ **6 ॰संबन्ध॰** ] V$_1$W$_1$; **॰संयोग॰** BCPG$_1$K$_1$ **7 तथा पूर्वे ऽपि** ] BCPG$_1$V$_1$; **तथापि पूर्वे** K$_1$; **तथा पूर्वे हि** W$_1$ **7 शक्यमेवानुमातुम्** ] BCPG$_1$K$_1$V$_1$; **शक्यते निबंधुमनुमानं** W$_1$

### [3.3.3 योनिजानां संभवः]

**न च योनिजानां केवलेन धर्माधिपत्येनाधर्माधिपत्येन वा संस्वेदजानामिव संभवो घटते, जरायुजाण्डजानां तथादर्शनाभावात्। दृष्टानुसारि हि सर्वत्रानुमानम्। तेन संस्वेदजेषु नियमेन दृष्टं न जरायुजाण्डजयोरप्ययोनिजत्वं शक्यते ऽनुमातुम्। न हि पाण्डुरमात्रेण बाष्पादपि वह्न्यनुमानम्। किं तु यादृशमेव पाण्डुरद्रव्यं**

---

**2** *Praśastapādabhāṣya* 5,12–6,1(§31): **शरीरं द्विविधम्—योनिजमयोनिजं च। तत्रायोनिजमनपेक्ष्य शुक्रशोणितं देवर्षीणां शरीरं धर्मविशेषसहितेभ्यो ऽणुभ्यो जायते। क्षुद्रजन्तूनां यातनाशरीराण्यधर्मविशेषसहितेभ्यो ऽणुभ्यो जायन्ते। शुक्रशोणितसन्निपातजं योनिजम्। तद् द्विविधम्—जरायुजमण्डजं च। मानुषपशुमृगाणां जरायुजम्। पक्षिसरीसृपाणामण्डजम्।**

**6** *Pramāṇavārttika* II 11–12 = *Pramāṇaviniścaya* III 69–70: **सिद्धं यादृगधिष्ठातृभावाभावानुवृत्तिमत्। संनिवेशादि तद् युक्तं तस्माद् यदनुमीयते॥ वस्तुभेदे प्रसिद्धस्य शब्दसाम्यादभेदिनः। न युक्तानुमितिः पाण्डुद्रव्यादिव हुताशने॥**; Cf. *Ṛjuvimalā* I 106,17: **न हि बाष्पादितुल्यं यथानुमानाभासे लिङ्गाभासं किंचित् कारणमत्रोपलभामहे।**; *Pramāṇasamuccayaṭīkā* II 96,4–5: **लिङ्गज्ञानं तु किंचिदनिश्चितमपि स्यादिति। बाष्पादिसाधारणं पाण्डुत्वादिमात्रं दृष्टवतः—किमयं धूम उत बाष्पादिरिति संदेहात्।**

---

**2 न च योनि॰** ] CPG$_1$; **न चाऽयमयोनि॰** BW$_1$; **नैवमयमयोनि॰** K$_1$; **न चायोनि॰** V$_1$ **2 केवलेन** ] BCPG$_1$K$_1$V$_1$; **केवल॰** W$_1$ **2 धर्माधिपत्येनाधर्माधिपत्येन वा** ] V$_1$; **धर्माधिपत्येन** CPG$_1$W$_1$; **धर्माधिपत्येन, अधर्माधिपत्येन च** BK$_1$ **3 संस्वेदजा॰** ] BCPG$_1$K$_1$V$_1$; **स्वेदजा॰** W$_1$ **3 तथादर्शनाभावात्** ] K$_1$V$_1$; **तथा तद्दर्शनाभावात्** BW$_1$; **तथादर्शनासंभवात्** CPG$_1$ **4 संस्वेद॰** ] BCPG$_1$K$_1$V$_1$; **स्वेद॰** W$_1$ **4 दृष्टं न** ] BCPG$_1$K$_1$V$_1$; **दृष्टं** W$_1$ **5 शक्यते** ] BCPG$_1$K$_1$V$_1$; **न शक्यते** W$_1$ **5 ऽनुमातुम्** ] BCPG$_1$V$_1$W$_1$; **वक्तुं** K$_1$ **6 पाण्डुर॰** ] K$_1$V$_1$; **पाण्डर॰** B; **पाण्डिम॰** CPG$_1$W$_1$ **6 बाष्पादपि** ] BG$_1$K$_1$V$_1$; **बाह्यादपि** CP; om. W$_1$ **6 वह्न्यनुमानम्** ] V$_1$; **वह्नेरनुमानम्** BCPG$_1$K$_1$W$_1$ **6 पाण्डुर॰** ] CPG$_1$K$_1$V$_1$; **पाण्डर॰** B; **पांडु॰** W$_1$ **6 ॰द्रव्यं** ] BG$_1$V$_1$W$_1$; **॰द्रव्ये** CP; **॰द्रव्य॰** K$_1$

नियमेन वह्निनियतं प्रतिपन्नम्, तादृशमेव तस्यानुमापकमुचितम्।

[3.4 नेश्वरो ऽधिष्ठाता]

यच्चेदमुदितम् "धर्माधर्मौ चेतनाधिष्ठितौ" इति, तदसिद्धमेव।

[3.4.1 क्षेत्रज्ञा एवाधिष्ठातारः]

यस्यैव तौ क्षेत्रज्ञस्य, स एवाधिष्ठातास्तु।

[3.4.2 ईश्वरो ऽप्यज्ञः]

[पू॰] अथाज्ञत्वात् तस्याधिष्ठातृत्वं नोपपद्यते।

[उ॰] तर्ह्यन्यस्यापि कथमुपपद्यते। न हि तस्यापि परपुरुषवर्तिधर्माधर्मज्ञानमुपपद्यते, कारणाभावात्।

[3.4.2.1 नेन्द्रियाणि कारणम्]

न हि तस्येन्द्रियाणि कारणम्, इन्द्रियाणां तत्र सामर्थ्यादर्शनात्।

---

**7** *Ṛjuvimalā* I 191,9–10: **अपि च यदि क्षेत्रज्ञा नाधिष्ठातारो ज्ञानाभावात्, अन्यस्तर्हि कथमधिष्ठाता, तस्यापि ज्ञानानुपपत्तेः।**

**11** *Kāśikā* ad *Saṃbandhākṣepaparihāra* 75 (Adyar ms., pp. 2988–89): **न तावत् साक्षात्कृताखिलक्षेत्रज्ञगतादृष्टशक्तिरधिष्ठाता जगतामेकः संभवति, प्रत्युक्तत्वादतीन्द्रियार्थदर्शनशक्तेः। नराणामकरणज्ञानोत्पत्त्यसंभवात्। भविष्यति न दृष्टं चेत्। इन्द्रियाणि हि ज्ञानकारणानि। तेषां च कारणानि कर्माणि। तन्न तानि**

---

**1 नियमेन** ] BCPG$_1$K$_1$V$_1$ ; **बह्निनियतं** W$_1$ **1 प्रतिपन्नम्** ] BG$_1$K$_1$V$_1$W$_1$ ; **प्रतिसंपन्नं** CP **1 तस्या॰** ] BCPG$_1$V$_1$ ; **दहनस्या॰** K$_1$W$_1$ **3 यच्चेदमुदितम्** ] BK$_1$W$_1$ ; **यच्चेदमुक्तं** CPG$_1$ ; om. V$_1$ **3 ॰धर्मौ** ] BCPG$_1$K$_1$V$_1$ ; **॰धर्मा** W$_1$ **3 चेतनाधिष्ठितौ" इति** ] K$_1$V$_1$ ; **चेतनातिशयाधिष्ठितौ" इति** B; **चेतनातिशयाधिष्ठानाविति** CPG$_1$ ; **चेतनाधिष्ठितादिति** W$_1$ **3 तद॰** ] V$_1$ ; **तदप्य॰** BCPG$_1$K$_1$W$_1$ **7 ॰धिष्ठातृत्वं** ] BK$_1$V$_1$ ; **॰धिष्ठानं** CPG$_1$ ; **॰धिष्ठानत्वं** W$_1$ **7 ॰द्यते** ] CPG$_1$V$_1$W$_1$ ; **॰द्यत इति चेत्** BK$_1$ **8 ॰पपद्यते** ] BCPK$_1$V$_1$W$_1$ ; **॰पपद्यते॥ तर्ह्यन्यस्यापि कथमुपपद्यते। तर्ह्यन्यस्यापि कथमुपपद्यते** G$_1$ **8 न हि** ] BCPG$_1$V$_1$W$_1$ ; om. K$_1$ **8 परपुरुषवर्ति॰** ] BCPG$_1$K$_1$V$_1$ ; **परपुरुषे प्रवृत्तिपक्षे** W$_1$ **9 ॰ज्ञानमु॰** ] BCPG$_1$V$_1$W$_1$ ; **॰ज्ञानन्नो॰** K$_1$ **11 तत्र सामर्थ्यादर्शनात्** ] BK$_1$V$_1$ ; **तत्रासामर्थ्यात्** CPG$_1$W$_1$

### [3.4.2.2 न केवलं मनः कारणम्]

न च केवलं मनः, केवलस्य मनसो बाह्येष्वप्रवृत्तेः। न हि धर्माधर्मरहितस्येश्वरस्येन्द्रियमनःसंबन्धो ऽस्ति, धर्माधर्मनिबन्धनत्वात् तत्संबन्धस्य।

### [3.4.2.3 नान्यत् कारणम्]

[पू०] अथ कारणमन्यदेवेश्वरबुद्धेः।

[उ०] तदयुक्तम्, प्रसिद्धकारणत्वाद्बुद्धेः। प्रसिद्धानि हि कारणानि बुद्धेः। यत्कारणं च यत् कार्यं दृष्टम्, तत्कारणमेव तदिति युक्तम्। अन्यथा चेतनाधिष्ठिता वासी दृष्टेति कथं धर्माधर्मयोरपि तदधिष्ठितत्वं भविष्यति।

---

निरवशेषिताशेषकर्माशय ईश्वरे संभवन्ति। तदभावात् कार्याभावः, कार्याभावनियतत्वाद्धेत्वभावस्य।

**2** *Ṛjuvimalā* I 191,10–12: आत्ममनःसंयोगाददृष्टापेक्षाद्विज्ञानानामुत्पत्तेस् तत्तदिन्द्रियार्थसंयोगसचिवात्। न चादृष्टेषु सामग्रीयमुपपद्यते।

**6** *Ṛjuvimalā* I 191,12–14: अथ तस्य कारणान्तरमस्तीति। तन्न, दृष्टकारणपरिहारेणादृष्टकारणान्तरानुमानानुपपत्तेः। दृष्टानुसारि सर्वत्रानुमानम्। सामान्यतोदृष्टमपि न दृष्टोपमर्देन क्वचिद्वर्तते।; *Kāśikā* ad *Saṃbandhākṣepaparihāra* 75 (Adyar ms., p. 2989): तन्नियमानभ्युपगमे वा सन्निवेशादिमतामपि नोत्पत्तिः सिध्येत् तस्याश्चेतनाधिष्ठानत्वं वा, अविशेषात्।

---

**2** न हि ] $BCPG_1K_1W_1$; न च $V_1$ **3** ०हितस्येश्वरस्ये० ] $BK_1V_1W_1$; ०हितस्ये० $CPG_1$ **3** ऽस्ति ] $CPG_1K_1V_1W_1$; भवति B **3** ०निबन्धन० ] $BCPG_1K_1V_1$; ०संबंधनिबंधन० $W_1$ **6** ०वेश्वर० ] $BCPG_1V_1W_1$; ०वेश्वरस्य $K_1$ **7** ०कारण० ] $BCPG_1K_1W_1$; ०कारणक० $V_1$ **8** यत्कारणं ] $BCPG_1K_1W_1$; यत्कारणकञ् $V_1$ **8** च ] $CPG_1V_1W_1$; हि $BK_1$ **8** तत्कारणमेव ] $CPG_1K_1V_1$; तत्कारणकमेव B; तत्कार्यमेव $W_1$ **9** अन्यथा ] $BCPG_1K_1W_1$; अन्यथा हि $V_1$ **9** चेतनाधिष्ठिता ] $BG_1K_1V_1$; चेतनाधिष्ठाना CP; चेतनाधिष्ठाता $W_1$ **9** वासी ] $BCPG_1K_1V_1$; वाशीति $W_1$ **10** भविष्यति ] $BCPG_1K_1V_1$; om. $W_1$

[3.4.2.4 नेश्वरबुद्धिरकारणा]

[पू॰] अथाकारणा नित्यैवेश्वरबुद्धिरिति।

[उ॰] तदप्यसुन्दरम्, बुद्धितत्त्वस्य नित्यत्वाभावात्। नित्या सती बुद्धिरेव न स्यात्। बुद्धिमता चाधिष्ठानं दृष्टम्, न पुनरन्येन।

[पू॰] अथादृष्टमपि बुद्धेर्नित्यत्वमङ्गीक्रियते।

[उ॰] तदा चेतनानधिष्ठितत्वमेव किमिति नाङ्गीक्रियते।

[पू॰] अथ सिद्धे ऽधिष्ठातृत्वे ज्ञानमपि कल्प्यत इति।

[उ॰] तदयुक्तम्, ज्ञानानुबन्धस्याधिष्ठातृत्वस्य कारणाभावात् प्रतिक्षिप्ते ज्ञाने सत्यनुमातुमशक्तेः।

---

**2** *Ṛjuvimalā* I 191,23–25: एतेनेदमपि निराकृतं भवति—नित्यैवेश्वरस्य बुद्धिरिति। यतो या या बुद्धिः सा सोत्पत्तिमती विनाशिनी च। तेनेश्वरस्यापि धिया तथाविधयैव भवितव्यम्।; *Kāśikā* ad *Saṃbandhākṣepaparihāra* 75 (Adyar ms., p. 2989): सहजमीश्वरज्ञानं न हेतुमपेक्षत इति चेत्। न, अनिन्द्रियजस्याज्ञानत्वात्। इन्द्रियजन्यमेव हि विकारं ज्ञानमाचक्षते। तत् कथमनिन्द्रियस्य भविष्यति। एवं च न बुद्धिपूर्वाधिष्ठानसिद्धिः।

**7** *Kāśikā* ad *Saṃbandhākṣepaparihāra* 75 (Adyar ms., p. 2995): व्याप्तिबलोपपन्ने ऽधिष्ठातरि ज्ञानकल्पनेति चेत्। न, अनन्तर्भावितज्ञानस्याधिष्ठानासिद्धेः। ज्ञानानुबन्धं ह्यधिष्ठानं हेत्वभावप्रतिक्षिप्ते ज्ञाने नानुमातुं शक्यते। तदितरेतराश्रयत्वम्—अधिष्ठानसिद्ध्या ज्ञानसिद्धिः, तत्सिद्ध्या चाधिष्ठानसिद्धिरिति।

---

**2 नित्यैवे॰** ] BPG$_1$K$_1$V$_1$W$_1$; **नित्येवे॰** C  **2 ॰बुद्धिरिति** ] CPG$_1$V$_1$W$_1$; **॰बुद्धिरिति चेत्** BK$_1$  **3 ॰सुन्दरम्** ] BCPG$_1$K$_1$V$_1$; **॰युक्तं** W$_1$  **3 ॰तत्त्वस्य नित्य॰** ] BCPG$_1$K$_1$V$_1$; **॰तत्त्व नित्य॰** W$_1$  **4 न स्यात्** ] BCPK$_1$V$_1$W$_1$; **न स्यात्। बुद्धिरेव न स्यात्** G$_1$  **4 दृष्टम्** ] BCPG$_1$K$_1$V$_1$; om. W$_1$  **4 न पुनरन्येन** ] BCPG$_1$W$_1$; **पुनरन्येन** K$_1$; **न पुनरन्येषां** V$_1$  **6 तदा** ] BCPG$_1$K$_1$V$_1$; **तथा** W$_1$  **6 चेतनान॰** ] BV$_1$W$_1$; **न चेतना॰** CPG$_1$; **चेतना॰** K$_1$  **6 ॰तत्वमेव** ] BCPG$_1$V$_1$; **॰ततत्वमपि** K$_1$; **॰तत्वमपि** W$_1$  **6 किमिति** ] BCPG$_1$V$_1$W$_1$; om. K$_1$  **8 तदयुक्तम्** ] BK$_1$V$_1$W$_1$; om. CPG$_1$  **8 ज्ञानानुबन्ध॰** ] W$_1$; **ज्ञानाद्यननुबद्ध॰** B; **ज्ञानाननुबद्ध॰** CPG$_1$; **ज्ञानाद्यनुबन्ध॰** K$_1$; **ज्ञानानुबद्ध॰** V$_1$

तेन शक्यज्ञानमेवाचेतनं चेतनाधिष्ठितमिति व्याप्तिराश्रयणीया, तथादर्शनात्। तक्षादयो हि शक्यज्ञानान्येव वास्यादीन्यधितिष्ठन्तो दृश्यन्ते, नान्यानि।

[3.4.3 अधिष्ठानार्थः]

अपि चाधिष्ठानार्थोऽपि चिन्तनीयः।

(१) न तावत् संयोगः, गुणत्वेन संयोगाभावाद् धर्माधर्मयोः।

(२) समवायोऽपि परपुरुषसमवायिनोर्धर्माधर्मयोरीश्वरं प्रत्यनुपपन्नः।

(३) वास्यादिषु तु तक्षादीनां करसंयोगादिरेवाधिष्ठानम्।

[3.4.4 धर्माधर्मप्रवृत्तिः]

तथा प्रवृत्तिरपि कीदृशी।

---

**1** *Kāśikā* ad *Saṃbandhākṣepaparihāra* 75 (Adyar ms., p. 2997): अतो दर्शनानुसारेण शक्यावगममेवाचेतनं चेतनाधिष्ठितमिति व्याप्तिराश्रयणीया। अतीन्द्रियाणां क्वचिदपि बुद्धिपूर्वाधिष्ठानादर्शनात्।

**5** *Ṛjuvimalā* I 191,25: किं चाधिष्ठानार्थोऽपि वक्तव्यः।

**9** *Ṛjuvimalā* I 191,25–26: यादृशं हि वास्यादिषु करसंयोगादिकमधिष्ठानं दृष्टम्, तादृशमेवादृष्टेष्वनुमातव्यम्। न च तत् संभवतीति।

**11** *Ṛjuvimalā* I 191,27–28: तथा प्रवृत्तिरपि कान्या स्वरूपलाभाददृष्टस्य यथा वास्याः क्रिया काष्ठादिसंयोगश्च। आत्मलाभश्चादृष्टस्य यागाद्यनुष्ठानसिद्ध एवेति।

---

**1** °वाचेतनं ] BCPG$_1$K$_1$V$_1$; °वाचेतनत्वं W$_1$ **2** वास्या° ] BCPG$_1$K$_1$V$_1$; वाक्या° W$_1^{ac}$; वाश्या° W$_1^{pc}$ **2** °धितिष्ठन्तो ] BCPG$_1$V$_1$W$_1$; °धिष्ठितारो K$_1$ **6** संयोगः, गुणत्वेन संयोगाभावाद् धर्माधर्मयोः ] K$_1$; संयोगः, गुणत्वेन धर्माधर्मयोस्संयोगाभावात् B; संयोगो धर्माधर्मयोर्गुणत्वेन संयोगाभावात् CPG$_1$V$_1$W$_1$; **9** वास्या° ] BCPG$_1$K$_1$V$_1$; वाश्या° W$_1$ **9** तु ] BG$_1$K$_1$V$_1$W$_1$; om. CP **9** कर° ] BCPG$_1$K$_1$W$_1$; करतल° V$_1$ **9** °योगादिरेवा° ] BCPG$_1$V$_1$W$_1$; °योग एवा° K$_1$ **9** °धिष्ठानम् ] BCPG$_1$V$_1$W$_1$; °धिष्ठान K$_1$ **11** प्रवृत्तिरपि ] BCPG$_1$V$_1$W$_1$; वृत्तिरपि K$_1$

### [3.4.4.1 न क्रिया]

न तावत् क्रिया, गुणभूतयोर्धर्माधर्मयोः क्रियाभावात्।

### [3.4.4.2 नोत्पत्तिः]

[पू॰] उत्पत्तिश्चेत्।

[उ॰] तर्हि सा क्षेत्रज्ञादेव समवायिकारणात्, आत्ममनःसंयोगाच्चासमवायिकारणादभिसंध्यादिनिमित्तकारणोपगृहीतादिति।

### [3.4.4.3 न फलदानम्]

[पू॰] फलदानमिति चेत्।

[उ॰] न। देशकालावस्थादिसहकारिसहिताभ्यां धर्माधर्माभ्यामेव फलम्, न चेतनव्यापारापेक्षम्।

---

**5 सा** ] BCP$G_1V_1W_1$; om. $K_1$ **5 ॰कारणात्, आत्म॰** ] BCP$G_1K_1V_1$; **॰कारणान्** $W_1$ **6 ॰संयोगाच्चा॰** ] BCP$G_1V_1$; **सन्निकर्षाच्चा॰** $K_1$; **॰संयोगाद॰** $W_1$ **6 ॰कारणादभि॰** ] BCP$G_1K_1^{pc}V_1W_1$; **॰कारणादपि** $K_1^{ac}$ **6 ॰गृहीतादिति** ] B $V_1W_1$; **॰गृहीतत्वात्** CP; **॰गृहीतात्** $G_1K_1$ **8 चेत्** ] BCP$K_1V_1W_1$; om. $G_1$ **9 ॰भ्यां धर्माधर्माभ्यामेव** ] B$K_1V_1W_1$; **॰भ्यामेव** CP$G_1$ **10 न** ] BCP $G_1K_1V_1$; om. $W_1$ **10 ॰पेक्षम्** ] BCP$G_1V_1W_1$; **॰पेक्षया** $K_1$

## [3.5 नेश्वरेच्छया परमाणव एव प्रवर्तन्ते]

### [3.5.1 दृष्टान्ताभावात्]

[पू॰] यदपि केचिदाहुः—परमाणव एवेश्वरेच्छया प्रवर्तन्त इति।
[उ॰] तदपि मन्दम्, क्वचित्तथाविधस्यादर्शनात्।
[पू॰] शरीरे तथादर्शनमिति चेत्।
[उ॰] न, तस्य क्षेत्रज्ञधर्माधर्मोपगृहीतत्वात्। न च परमाणव एवेश्वरस्य धर्माधर्मोपगृहीताः।

### [3.5.2 नेच्छामात्रेण प्रवृत्तिः]

न च तस्यापीच्छामात्रेण प्रवृत्तिः, किं तु प्रयत्नवशात्।

---

**3** *Ślokavārttika Saṃbandhākṣepaparihāra*, vv. 81–82ab: कुलालवच्च नैतस्य व्यापारो यदि कल्प्यते (कल्प्यते] corr.; कल्पते ed.)। अचेतनः कथं भावस्तदिच्छामनुरुध्यते॥ तस्मान्न परमाण्वादेरारम्भः स्यात्तदिच्छया।; *Kāśikā* ad *Saṃbandhākṣepaparihāra* 80 (Adyar ms., pp. 3003–4): तदिच्छामात्रेण त्वणवः परस्परं संयुज्य विश्वमारचयन्तीति न प्रमाणवत्, अचेतनस्यादृष्टपरमाण्वादेर्भावस्येश्वरेच्छामात्रेण वृत्तेरसंभवात्। चेतनो हि नरपतिपरिचारः कथंचिदिच्छां विदित्वा तदाशयानुविधायी भवतीति पश्यामः, न चाचेतनानेव तदिच्छया चेष्टमानान्।
**5** *Kāśikā* ad *Saṃbandhākṣepaparihāra* 80 (Adyar ms., p. 3004): स्यादेतत्। दृश्यत एवाचेतनानामपि करचरणादीनां क्षेत्रज्ञेच्छया वृत्तिरिति। तन्न, तत्कर्मार्जितत्वात्तेषां। नैवमीश्वरकर्मणा निर्मितान्यदृष्टान्यणवो वा येन तद्वशानि भवेयुः।
**9** Cf. *Ślokavārttika Saṃbandhākṣepaparihāra* 76cd: इच्छानन्तरसिद्धिस्तु दृ-

---

**3** ॰रेच्छया ] CPG$_1$V$_1$; ॰रेच्छावशेन BK$_1$; ॰रशेन W$_1^{ac}$; ॰रवशेन W$_1^{pc}$ **4** मन्दम् ] V$_1$; न युक्तम् BCPG$_1$W$_1$; तदयुक्तं K$_1$ **4** ॰विधस्या॰ ] V$_1$; ॰विधस्याधिष्ठानस्या॰ BCPG$_1$K$_1$W$_1$ **4** ॰दर्शनात् ] BCPG$_1$K$_1$V$_1$; ॰भावात् W$_1$ **5** ॰दर्शनमिति ] BK$_1$V$_1$; ॰दर्शनादिति CPG$_1$W$_1$ **6** न ] BCPG$_1$K$_1$V$_1$; om. W$_1$ **6** क्षेत्रज्ञधर्माधर्मोप॰ ] K$_1$V$_1$; क्षेत्रज्ञधर्माधर्मपरि॰ B; धर्माधर्मोपसं॰ CP; धर्माधर्मोप॰ G$_1$W$_1$ **6** न च ] CPG$_1$K$_1$V$_1$W$_1$; न B **7** एवेश्वरस्य ] CPG$_1$V$_1$; एवेश्वर॰ BW$_1$; ईश्वर॰ K$_1$ **7** ॰धर्मोप॰ ] CPG$_1$V$_1$W$_1$; ॰धर्मपरि॰ BK$_1$ **9** न च ] BCPG$_1$V$_1$W$_1$; न हि K$_1$ **9** तस्यापी॰ ] K$_1$V$_1$W$_1$; तस्ये॰ BCPG$_1$

[3.5.3 नेच्छाया हेतुरस्ति]

न चेच्छाया अपि हेतुरस्ति।

[3.5.4 न नित्या तस्येच्छा]

न च नित्यैवेच्छा, नित्यप्रवृत्तिप्रसङ्गात्।

[3.6 अचेतनत्वहेतुविशेषणम्]

अपि च

(१) यथाचेतनत्वाच्चेतनाधिष्ठितत्वमनुमीयते,

(२) तथा प्रयोजनाभावादनधिष्ठानम्

---

ष्टान्ते ऽपि न विद्यते॥; *Kāśikā* ad *Saṃbandhākṣepaparihāra* 76cd: **यदि तु चेतनेच्छानन्तरसिद्धयो देहादयः सन्निवेशविशिष्टत्वात्, घटादाविच्छानन्तरसिद्धेरदर्शनात् साध्यविकलो दृष्टान्त इत्याह—"इच्छा" इति।**

**2** *Ślokavārttika Saṃbandhākṣepaparihāra* 73: **न चानिमित्तया युक्तमुत्पत्तुं हीश्वरेच्छया। यद्वा तस्या निमित्तं यत् तद् भूतानां भविष्यति॥**

**4** Cf. *Nyāyamañjarī* Kataoka 2005: 314(101),8–9(§3.9.4): **ननु ज्ञानानन्दवदिच्छापि नित्या चेदीश्वरस्य तर्हि सर्वदा तदिच्छासंभवात् सर्वदा जगदुत्पत्तिरिति जगदानन्त्यप्रसङ्गः।**

**6** See §2.2.2.1; cf. *Ṛjuvimalā* I 191,14–18: **नन्वेतदपि दृष्टम्—चेतनानधिष्ठितमचेतनं न प्रवर्तत इति। एतत्तर्हि परिहीणं भवति। सत्यम्, उभयत्र प्रहाणे किं परिहीयतामिति। तत्र विशेषविषयत्वादस्मदीयमेव ज्ञानोदयकारणानुमानमादरणीयम्, न पुनरीश्वरवादिनामत्यन्तसामान्यविषयम् "अचेतनं चेतनाधिष्ठितम्" इति, विशेषानुमानस्य बलीयस्त्वात्।**

**8** See §2.2.3.3.

---

**2 चेच्छाया अपि** ] $K_1V_1W_1$ ; **चेच्छायामपि** $BCPG_1$  **2 हेतुरस्ति** ] $BCPG_1K_1V_1$ ; **हेतुरुपद्यते** $W_1^{ac}$ ; **हेतुरुपपद्यते** $W_1^{pc}$  **4 नित्यैवेच्छा** ] $BCPG_1V_1W_1$ ; **नित्येच्छा** $K_1$  **4 नित्यप्रवृत्ति॰** ] $V_1W_1$ ; **नित्यं प्रवृत्ति॰** $BK_1$ ; **नित्यत्व॰** $CPG_1$  **6 अपि च** ] $BK_1V_1W_1$ ; om. $CPG_1$  **7 ॰मनुमीयते** ] $BCPG_1V_1W_1$ ; **॰मवम्मीयते** $K_1^{ac}$ ; **॰मवसम्मीयते** $K_1^{pc}$

—इति न ज्ञायते “कतरदनुमानं बलीयः” इति।

[3.6.1 प्रयोजनवदचेतनं चेतनाधिष्ठितम्]

तेन यत्रैव प्रयोजनम्, तदेवाचेतनं चेतनाधिष्ठितमिति व्याप्तिरभ्युपगमनीया, तथादर्शनात्।

[3.6.2 विग्रहादिमदधिष्ठानयोग्यमेवाचेतनं चेतनाधिष्ठितम्]

अपि च व्याप्तिग्रहणपुरःसरमनुमानम्, अन्वयव्यतिरेकाभ्यां च व्याप्तिरवगम्यते। यथा च चेतनो ऽधिष्ठातेति प्रतीयते, तथा विग्रहादिमानपि। तेनानुमानं प्रवर्तमानं तथाविधमेवानुमापयेत्। न च तस्य धर्माधर्मौ परमाणून् वा प्रत्यधिष्ठातृतोपपद्यत इत्यनधिष्ठानमेव। तेन विग्रहादिमदधिष्ठानयोग्यमेवाचेतनं चेतनाधिष्ठितमिति व्याप्तिराश्रयणीया।

---

**1 °दनधिष्ठानम्—इति न** ] $V_1$ ; **°दप्यनधिष्ठानमिति** $BCPG_1$ ; **°दधिष्ठान इति न** $K_1$ ; **°दनधिष्ठातृत्वमपि न** $W_1$　**1 कतरद°** ] $K_1V_1W_1$ ; **कतरदत्रा°** $BCPG_1$　**1 इति** ] $K_1V_1W_1$ ; **इति चिन्तयामः** B ; **इति न विद्मः** $CPG_1$　**3 तदेवाचेतनं चेतना°** ] $BG_1V_1W_1$ ; **तदेव चेतना°** CP ; **तत्रैवाचेतनं चेतना°** $K_1$　**4 °रभ्युपगमनीया** ] $CPG_1V_1$ ; **°राश्रयणीया** $BK_1$ ; **°रंगीकरणीया** $W_1$　**6 °पुरःसर°** ] $CPG_1V_1$ ; **°पूर्वक°** $BK_1W_1$　**6 °भ्यां च** ] $BCPG_1K_1V_1$ ; **°भ्यां** $W_1$　**7 यथा च** ] $BCPG_1K_1V_1$ ; **यथा** $W_1$　**7 ऽधिष्ठातेति** ] $BCPG_1K_1V_1^{pc}$ ; **धिष्ठितिः** $V_1^{ac}$ ; **धिष्ठाता** $W_1$　**7 प्रतीयते** ] $BCPG_1K_1V_1$ ; **प्रमीयते** $W_1$　**8 °नुमानं** ] $BCPG_1$ ; **°नुमानमपि** $K_1V_1W_1$　**8 प्रवर्तमानं** ] $BK_1V_1W_1$ ; om. $CPG_1$　**10 तेन** ] $BCPG_1K_1W_1$ ; **चेतन°** $V_1$　**10 °ष्ठानयोग्यमे°** ] $BK_1V_1W_1$ ; **°ष्ठानमे°** $CPG_1$

[3.6.2.1 नानुमानोच्छेदः]

[पू०] नन्वेवं सति धूमानुमानस्य प्रसिद्धस्योच्छेदः प्राप्नोति।

(१) यथाभूतेन हि महानसादिवर्तिना व्याप्तिरवगता, न तथाभूतस्यानुमानम्।

(२) यथाविधस्य चानुमानम्, न तथाविधस्य व्याप्तिसमये ऽवधारणमिति।

[उ०] तदयुक्तम्, देशकालाद्युपाधिपरित्यागेन हि सामान्येन संबन्धग्रहणम्। तेनेहापि भवत्येतद् यद् वास्यादिषु दृष्टं तद् धर्माधर्म-

---

**2** *Kāśikā* ad *Saṃbandhākṣepaparihāra* 75 (Adyar ms., p. 2997): नन्वेवं सर्वत्रैवानुमित्सितदेशाद्यन्वयो नावगत इत्यननुमानम्। यस्य यथाविधस्यान्वयो ज्ञातः, न तद् अनुमेयम्। यद् अनुमेयम्, न तेनान्वयो ज्ञात इत्यनुमानव्यवहारोच्छेदः।
**3** *Ślokavārttika Saṃbandhākṣepaparihāra* 80: यथासिद्धे च दृष्टान्ते भवेद्धेतोर्विरुद्धता। अनीश्वरविनाश्यादिकर्तृमत्त्वं प्रसज्यते॥
**5** *Ślokavārttika Saṃbandhākṣepaparihāra* 79: कुम्भकाराद्यधिष्ठानं घटादौ यदि चेष्यते। नेश्वराधिष्ठितत्वं स्याद्, अस्ति चेत्साध्यहीनता॥
**7** *Kāśikā* ad *Saṃbandhākṣepaparihāra* 75 (Adyar ms., p. 2998): अपि चान्वयव्यतिरेकसमधिगम्या हि व्याप्तिः। तत्काले च सकलदेशाद्युपाधिपरित्यागेन धूमवन्मात्रस्याग्निना व्याप्तिरवगतेति सर्वत्र धूमवतामेवाग्निमत्त्वम्, तन्मात्रानुबन्धित्वाद् अग्निमत्तायाः।

---

**2** धूमानुमानस्य प्रसिद्ध° ] $V_1$; प्रसिद्धस्यापि धूमाद्यनुमान° B; प्रसिद्धस्याप्यनुमान° $CPG_1$; प्रसिद्धस्यापि धूमानुमान° $K_1$; प्रसिद्धकारणस्यापि धूमानुमान° $W_1$   **3** °रवगता ] $BCPG_1K_1V_1$; °रवगम्यते $W_1$   **4** न तथाभूतस्यानुमानम् ] $V_1$; न तथाविधस्यानुमानम् $BCPG_1K_1$; तथाविधस्य नानुमानं $W_1$   **5** यथाविधस्य चानुमानम् ] $V_1$; यथाविधस्यानुमानम् $BCPG_1K_1W_1$   **5** न तथाविधस्य ] $BCPG_1V_1$; तथाविधस्य $K_1$; तथाविधस्य न $W_1$   **6** व्याप्तिसमये ऽवधारण° ] $G_1V_1$; व्याप्तिधीसमयेऽनवधारण° B; व्याप्तिधीसमये ऽवधारण° CP; व्याप्तिसमये नावधारण° $K_1$; व्याप्त्यवधारण° $W_1$   **7** हि सामान्येन ] $BK_1V_1$; सामान्येन हि $CPG_1$; सामान्यतस् $W_1$   **8** भवत्येतद् यद् ] $V_1$; भवत्येव यद् B; भवत्येतद् $CPG_1W_1$; भवत्येव तत् यद् $K_1$   **8** वास्या° ] $BCPG_1K_1V_1$; वाश्या° $W_1$   **8** दृष्टं तद् ] $BK_1V_1W_1$; दृष्टं $CPG_1$

योरपीति।

[3.6.2.2 विग्रहवत्त्वाद्यपि व्याप्त्यनुप्रवेशि]

यादृशं स्वरूपं व्यापकमुपलभ्यते, तदेवानुमातुं शक्यते, नान्यत्। इह च विग्रहवत्त्वाद्यपि व्याप्त्यनुप्रवेशीति तदनुमातव्यम्।

[3.6.2.3 न विग्रहरहितचेतनानुमानम्]

न च तदनुमातुं शक्यत इति वरं चेतनानुमानत्याग एव तदननुबद्धस्य तस्यानुमानात्।

[3.7 नेश्वरस्य सर्वज्ञानम्]

न चेश्वरस्य सर्वज्ञानमपि सिध्यति, ज्ञानहेत्वभावे ज्ञानाभावनिश्चयात्।

---

**3** *Kāśikā* ad *Saṃbandhākṣepaparihāra* 75 (Adyar ms., pp. 2998–99): इह तु शक्यावगमप्रयोजनवत्त्वादीनामव्यभिचारात् तेषामपि व्याप्तावनुप्रवेश इत्यतीन्द्रियाणां न प्रेक्षावदधिष्ठातृकत्वम्।

---

**3 यादृशं स्वरूपं** ] $V_1$; **यादृशं तु रूपं** $BK_1$; **यादृशस्वरूपं** $CPG_1$; **यादृशं रूपम्** $W_1$ **3 व्यापकमुप°** ] $BCPG_1K_1V_1$; **उप°** $W_1$ **4 इह च** ] $BK_1V_1W_1$; **इह तु** $CPG_1$ **4 व्याप्त्य°** ] $BCPG_1V_1W_1$; **व्याप्त्या°** $K_1$ **6 न च** ] $BK_1V_1$; **न** $CPG_1W_1$ **6 शक्यत** ] $BCPG_1K_1V_1$; **शक्यम्** $W_1$ **6 इति** ] $CPG_1K_1V_1W_1$; **इति चेत्** B **6 °त्याग एव** ] $K_1V_1W_1$; **°त्यागस्** B; **°बाध एव** $CPG_1$ **7 तदननुबद्धस्य तस्यानुमानात्** ] $BV_1$; **तदनुबद्धस्य तस्यानुमानस्य स्यात्** $CPG_1$; **तदनुबद्धस्य तस्यानुमानात्** $K_1$; **तदनुबंधस्यानुमानात्** $W_1$ **9 न चेश्वरस्य** ] $CPG_1^{pc}K_1V_1$; **तेनेश्वरस्य** $BW_1$; **तस्मादनादिरेव वृद्धपरंपराभ्युपगमनी न चेश्वरस्य** $G_1^{ac}$ **9 सर्वज्ञानमपि सिध्यति, ज्ञानहेत्वभावे** ] $V_1$; **सर्वज्ञतानुमाने हेत्वभावेन** B; **सर्वज्ञानमपि सिध्यति ज्ञानहेत्वभावेन** $CPG_1K_1$; **सर्वज्ञतानुमाने हेत्वभावे** $W_1$

### [4 अनादिर्वृद्धव्यवहारपरंपरा शब्दार्थावगमहेतुः]

तेनानादिरेव वृद्धव्यवहारपरंपरा शब्दार्थावगमहेतुः।

### [4.1 न सृष्ट्यादावीश्वरकृतः संकेतः]

न सृष्ट्यादावीश्वरकृतः संकेतः, संकेतस्यैव कर्तुमशक्तेः। न खल्वद्यतना जनाः संकेतवाक्यस्यार्थमनवबुध्यमानाः संकेतं प्रतिपद्यन्ते।

### [4.2 अनादिरेव वृद्धव्यवहारपरंपरा]

तस्मादनादिरेव वृद्धव्यवहारपरंपराभ्युपगमनीया।

---

**5** *Śābarabhāṣya* ad 1.1.3–5(5c), I 195,5–12, Frauwallner 1968: 46,15–48,1: **अपर आह। अव्यतिरेकश्च। न हि संबन्धव्यतिरिक्तः कश्चित् कालो ऽस्ति यस्मिन्न कश्चिदपि शब्दः केनचिदर्थेन संबद्ध आसीत्। कथम्। संबन्धक्रियैव हि नोपपद्यते। अवश्यमनेन संबन्धं कुर्वता केनचिच्छब्देन कर्तव्यः। येन क्रियेत, तस्य केन कृतः। अथान्येन केनचित् कृतः, तस्य केनेति, तस्य केनेति नैवावतिष्ठते। तस्मादवश्यमनेन संबन्धं कुर्वताकृतसंबन्धाः केचन शब्दा वृद्धव्यवहारसिद्धा अभ्युपगन्तव्याः।**; *Ślokavārttika Saṃbandhākṣepaparihāra* 134ab (regarding Śabara's two interpretations of *avyatirekaś ca*): **अतो व्याख्या द्वितीयैवात्र शोभना।**

**7** *Ślokavārttika Saṃbandhākṣepaparihāra* 117: **एवं ये युक्तिभिः प्राहुस्तेषां दुर्लभमुत्तरम्। अन्वेष्यो व्यवहारो ऽयमनादिर्वेदवादिभिः॥**

---

**2 तेनानादिरेव** ] $BCPG_1K_1V_1$ ; **अनादिरेव** $W_1$ **2 °व्यवहार°** ] $BK_1V_1W_1$ ; om. $CPG_1$ **2 °वगम°** ] $V_1W_1$ ; **°वगमे** $BCPG_1K_1$ **4 न** ] $CPG_1K_1V_1$ ; **न च** $BW_1$ **4 संकेतस्यैव** ] $BK_1V_1W_1$ ; **तस्यैव** $CPG_1$ **5 खल्वद्यतना जनाः** ] $BV_1$ ; **खल्वाद्या जनाः** $CPK_1$ ; **खल्वाद्यान्जनाः** $G_1$ ; **खल्वाद्यो जनस्** $W_1$ **5 संकेतवाक्यस्या°** ] $BK_1V_1W_1$ ; **संकेतस्या°** $CPG_1$ **5 °मानाः** ] $BCPG_1K_1V_1$ ; **°मानस्** $W_1$ **5 प्रतिपद्यन्ते** ] $BCPG_1K_1V_1$ ; **प्रतिपद्यते** $W_1$ **7 °व्यवहार°** ] $BK_1V_1W_1$ ; om. $CPG_1$ **7 °राभ्युपगमनीया** ] $BCPG_1K_1V_1$ ; **°रांगीकरणीया** $W_1$

### [4.3 पौरुषेयत्वे वेदानामप्रामाण्यम्]

एवं च पुरुषस्य धर्मप्रतीतिं प्रति शब्दमन्तरेणोपायाभावान्न पौरुषेयत्वे वेदस्यापूर्वात्मके वेदार्थे प्रामाण्योपपत्तिरित्यपौरुषेयत्वाश्रयणम्।

### [4.4 वेदानामपौरुषेयत्वम्]

[पू॰] कथं पुनरपौरुषेयत्वं वेदानाम्।

### [4.4.1 कर्तुरस्मरणात्]

[उ॰] पुरुषस्य कर्तुरस्मरणात्।

---

**7** *Bṛhatī* ad 1.3.32, III 157,6–7: **न च वृद्धव्यवहारादन्यद् व्युत्पत्तौ कारणमुपलभामहे, कर्तुरस्मरणाद् इत्युक्तम्।**; *Ṛjuvimalā* III 157,21–22 (ad 1.3.32): **न च वृद्धव्यवहारादन्यद् व्युत्पत्तिकारणमुपलभामहे, कर्तुरस्मरणात् संबन्धस्य। यदि हि संबन्धस्य कर्ता स्मर्येत, तदा संकेतवशेनैव व्युत्पत्तिः स्यात्। न च कर्ता स्मर्यत इत्युक्तम्।**; *Śābarabhāṣya* ad 1.1.3–5(5b), I 178,2–182,3, Frauwallner 1968: 42,20–44,12: **ननु चिरवृत्तत्वात् प्रत्यक्षस्याविषयो भवेदिदानीन्तनानाम्। न हि चिरवृत्तः सन्न स्मर्येत। न च हिमवदादिषु कूपारामादिवदस्मरणं भवितुमर्हति। पुरुषवियोगो हि तेषु भवति देशोत्सादेन कुलोत्सादेन वा। न तु शब्दार्थव्यवहारवियोगः पुरुषाणामस्ति। स्यादेतत्। संबन्धमात्रव्यवहारिणो निष्प्रयोजनं कर्तृस्मरणमनाद्रियमाणाः पुरुषा विस्मरेयुरिति। तन्न। यदि हि पुरुषः कृत्वा संबन्धं व्यवहारयेत्, व्यवहारकाले ऽवश्यं स्मर्तव्यो भवेत्। संप्रतिपत्तौ हि कर्तृव्यवहर्त्रोरर्थः सिध्यति, न विप्रतिपत्तौ। न हि वृद्धिशब्देनापाणिनेर्व्यवहारत आदैचः प्रतीयेरन्, पाणिनिकृतिमननुमन्यमानस्य वा।तथा मकारेणाप्यपिङ्गलस्य न सर्वगुरुस्त्रिकः प्रतीयेत पिङ्गलकृतिमननुमन्यमानस्य वा। तेन कर्तृव्यवहर्तारौ संप्रतिपद्येते। तेन वेदैर्व्यवहरद्भिरवश्यं स्मरणीयः संबन्धस्य कर्ता स्याद् व्यवहा-**

---

**2 एवं च** ] $G_1K_1V_1W_1$; **एवं** BCP　**2 पुरुषस्य** ] $BCPG_1K_1V_1$; **पुरुष॰** $W_1$　**2 ॰प्रतीतिं प्रति** ] $BCPG_1K_1V_1$; **॰प्रतीतेः** $W_1$　**3 ॰वान्न पौरुषेयत्वे** ] $CPG_1K_1W_1$; **॰वान्न पौरुषयत्वे** B; **॰वादपौरुषेयत्वं** $V_1$　**3 ॰पूर्वात्मके** ] CP $G_1K_1V_1$; **॰पूर्वकार्यात्मके** $BW_1$　**3 प्रामाण्यो॰** ] $BCPG_1V_1W_1$; **प्रमाण्यो॰** $K_1$ **3 ॰रित्य॰** ] $CPG_1V_1$; **॰रिति वेदस्या॰** $BW_1^{pc}$; **॰रित्यभ्य॰** $K_1$; **वेदस्या॰** $W_1^{ac}$　**5 कथं पुनर॰** ] $CPG_1K_1V_1W_1$; **कथम॰** B　**7 पुरुषस्य** ] $CPG_1K_1V_1$; **उच्यते** $BW_1$　**7 कर्तुर॰** ] $BCPK_1V_1W_1$; **कर्त्तु॰** $G_1$

### [4.4.2 न कर्त्रनुमानम्]

न चानुमानमपि कर्तुरुपपद्यते, प्रमाणान्तराप्रतीते ऽर्थे पुरुषाणां वाक्यविरचनायामशक्तेः।

### [4.4.3 काठकादिसमाख्या]

काठकादिसमाख्यापि न कर्तृसद्भावं साधयितुमलम्, प्रवचनतो ऽपि

रस्य च। न हि विस्मृते “वृद्धिरादैच्” (*Aṣṭādhyāyī* 1.1.1) इत्यस्य सूत्रस्य कर्तरि “वृद्धिर्यस्याचामादिस्तद् वृद्धम्” (*Aṣṭādhyāyī* 1.1.73) इति किंचित् प्रतीयेत। तस्मादस्मरणादवगच्छामः—न कृत्वा संबन्धं व्यवहारार्थं केनचिद् वेदाः प्रणीता इति।; *Śābarabhāṣya* ad 1.1.25, I 399,2–3, Kataoka 2020b: 344(25),5–6: यच्चैतत् संघाताः पुरुषकृता दृश्यन्त इति, परिहृतं तदस्मरणादिभिः।

**5** *Śābarabhāṣya* ad 1.1.27, I 402,4–403,4 (*pūrvapakṣa*): कथं पुनः कृतका वेदा इति। केचिन्मन्यन्ते। यतः पुरुषाख्याः। पुरुषेण हि समाख्यायन्ते वेदाः—काठकं कालापकं पैप्पलादकं मौद्गलमिति। न हि संबन्धादृते समाख्यानम्। न च पुरुषस्य शब्देनास्ति संबन्धो ऽन्यदतः—“कर्ता पुरुषः, कार्यः शब्दः” इति। ननु प्रवचनलक्षणा समाख्या स्यात्। नेति ब्रूमः। असाधारणं हि विशेषणं भवति। एक एव हि कर्ता बहवो ऽपि प्रब्रूयुः। अतो ऽस्मर्यमाणो ऽपि चोदनायाः कर्ता स्यात्। तस्मान्न प्रमाणम् “चोदनालक्षणो ऽर्थो धर्मः” इति।

**5** *Śābarabhāṣya* ad 1.1.30 (*ākhyā pravacanāt*), I 404,6–13 (*uttarapakṣa*): यदुक्तं कर्तृलक्षणा समाख्या काठकाद्या इति। तदुच्यते। नेयमर्थापत्तिः। अकर्तृभिरपि ह्येनामाचक्षीरन्। प्रकर्षेन वचनमनन्यसाधारणं कठादिभिरनुष्ठितं स्यात्। तथापि हि समाख्यातारो भवन्ति। स्मर्यते च वैशंपायनः सर्वशाखाध्यायी। कठः पुनरिमां

**2** चानुमानमपि ] $BCPG_1K_1W_1$; चानुमापि $V_1$ **2** कर्तुरुपपद्यते ] $BCPG_1K_1V_1$; कर्तुः $W_1$ **2** °राप्रतीते ] $K_1V_1W_1$; °रेणाप्रतीते $BCPG_1$ **2** ऽर्थे ] $BK_1V_1W_1$; om. CP; °षु $G_1$ **2** पुरुषाणां ] $BCPG_1V_1W_1$; om. $K_1$ **3** वाक्यवि° ] $V_1$; वाक्यस्य $BCPG_1$; वाक्य° $K_1W_1$ **5** काठका° ] $BCPG_1V_1W_1$; काका° $K_1$ **5** °समाख्यापि ] $BCPG_1V_1$; °समाख्या प्रवच° $K_1$; °समाख्या च $W_1$ **5** न कर्तृसद्भावं ] $CPG_1V_1$; कर्तृसद्भावं न B; °नकर्तृसद्भावं $K_1$; कर्तृसद्भावम् $W_1$ **5** साधयितुमलम् ] $BK_1V_1$; उपकल्पयितुमलम् $CPG_1W_1$ **5** प्रवचनतो ऽपि ] $K_1V_1W_1^{pc}$; प्रवचनेनापि $BCPG_1$; प्रवचतो पि $W_1^{ac}$

तदुपपत्तेः।

### [4.4.4 मन्त्रार्थवादाः]

मन्त्रार्थवादास्तु न स्वातन्त्र्येणार्थमवगमयितुमीशते, किं तु विध्युद्देशानुसारेण तदनुगुणमर्थम् इति न सिद्धार्थप्रतिपादने तेषां प्रामाण्यम्।

### [4.4.5 शब्दार्थसंबन्धस्यापौरुषेयत्वम्]

—इति सिद्धमपौरुषेयत्वं शब्दार्थसंबन्धस्येति।

---

केवलां शाखामध्यापयां बभूवेति। स बहुशाखाध्यायिनां सन्निधावेकशाखाध्याय्यन्यां शाखामनधीयानस्तस्यां प्रकृष्टत्वादसाधारणमुपपद्यते विशेषणम्।

**3** See §2.4.2; *Ṛjuvimalā* I 19,19–22 (ad 1.1.1): केचिन् मन्त्रार्थवादानामपि यथाश्रुतमर्थं वर्णयन्ति सिद्धरूपम् “अकार्ये ऽप्यर्थे वेदः प्रमाणम्” इति वदन्तः। कार्यमात्रप्रामाण्यपक्षे हि कार्यानुगुण्याद् गुणवादादिभिर्व्याख्यानम्, इतरथा श्रौत एवार्थः स्यात्।; *Ślokavārttika Saṃbandhākṣepaparihāra* 61–63: एवं वेदो ऽपि तत्पूर्वस् तत्सद्भावादिबोधने। साशङ्को न प्रमाणं स्यान्, नित्यस्य व्यापृतिः कुतः॥ यदि प्रागप्यसौ तस्मादर्थादासीन्, न तेन सः। संबद्ध इति तस्यान्यस् तदार्थो (तदार्थो ] em.; तदर्थो ed.) ऽन्यप्ररोचना॥ स्तुतिवाक्यकृतश्चैष जनानां मतिविभ्रमः। पौर्वापर्यापरामृष्टः शब्दो ऽन्यां कुरुते मतिम्॥

---

**3** °वादास्तु ] BK$_1$V$_1$; °वादाश्च CPG$_1$W$_1$ **4** °ने तेषां ] BK$_1$V$_1$W$_1$; °नेनैषां CPG$_1$ **5** प्रामाण्यम् ] BCPK$_1$V$_1$W$_1$; प्राण्यम् G$_1$ **7** °संबन्धस्येति ] BCPG$_1$V$_1$W$_1$; °संबन्धस्य K$_1$

## [5 प्रकरणोपसंहारः]

दुस्तर्कतिमिरं भेत्तुं शिष्याणां दृष्टिरोधकम्।
इदं शालिकनाथेन विहितं विमलाञ्जनम्॥ ४॥

---

**3** *Ṛjuvimalā* III 142,19–20 (ad 1.3.29): **वृद्धव्यवहारपरंपरया हि शब्दार्थव्यवहारसिद्धिरविच्छिन्ना च सा व्यवहारपरंपरेत्युक्तं संबन्धपरिहारे विमलाञ्जने चास्माभिः।**; III 299,15–16 (ad 2.1.1): **विमलाञ्जने ऽनादित्वस्य ज्ञापितत्वात्।**

---

**3** In $V_1$, the present chapter ends with **शालिकनाथेनवि** [**हितं**], without ending the verse due to the limited space at the right end of the bottom.

---

**2 °तिमिरं** ] $BCPG_1V_1W_1$; **°मितरं** $K_1$ **2 दृष्टिरोधकम्** ] $BK_1V_1W_1$; **दृङ्गिरोधकं** $CPG_1$ **3 शालिक°** ] $BCPG_1K_1V_1$; **बालक°** $W_1$ **3 विहितं विमलाञ्जनम्** ] $BK_1W_1$; **विहितं निर्मलाञ्जनं** $CPG_1$; **वि++** $V_1$ **4** no colophon ] $G_1K_1V_1W_1$; **इति महामहोपाध्यायश्रीशालिकनाथमिश्रप्रणीतायां प्रकरणपञ्चिकायां विमलाञ्जनं नाम सप्तमं प्रकरणं समाप्तम्** B; **इति महामहोपाध्यायश्रीशालिकनाथकृतौ प्रकरणपञ्चिकायां निर्मलाञ्जनं नाम सप्तमं प्रकरणम्** CP